राष्ट्रहिताय संस्कृतम्

Vol. V (2018-2019)
ISSN - 2277-7067

Peer Reviewed

Journal of Fundamental & Comparative Research

शोधसंहिता

A Bi-annual Interdisciplinary Research Journal of KKSU
Peer Reviewed Journal of Fundamental & Comparative Research

शोधसंहिता

Editor in Chief **:** **Prof. Shrinivasa Varkhedi**
Hon'ble Vice Chancellor

General Editor : **Prof. Madhusudan Penna**

Editorial Board : **Dr. Nanda Puri**, **Dr. C.G.Vijaykumar**, **Dr. Lalita Chandratre**, **Dr. K. K. Pandey**, **Dr. Deepak Kapde** (Secretary)

Peer Review Committee : **Dr. Leena Rastogi**, **Dr. D. K. Kulkarni**

Published by : **Registrar,** KKSU, Ramtek

राष्ट्रहिताय संस्कृतम्

KAVIKULAGURU KALIDAS SANSKRIT UNIVERSITY
RAMTEK

संपादकीयम्...

आचार्यः श्रीनिवासः वरखेडी
कुलगुरुः, ककासंवि

संस्कृत–तदितरभाषाविषयकं शास्त्रविषयकञ्च संशोधनं विदधतां विपश्चिद्वराणां संशोधने कृतप्रवेशानाञ्च संशोधकानां पुरतः शोधसंहिताया नवीनमिममङ्कं समर्पयन्त्याः मे महानानन्दो भवति ।अत एव शोधसंहिताया माध्यमेन नवीनम् उपयुक्तञ्च संशोधनं वयं प्रकाशयितुं सर्वदा उद्युक्ता इति न तिरोहितं भवताम्।

सांप्रतिककाले संस्कृतविषये जनानां मनस्सु महत्यभिरुचिर्दृश्यते । जगति बहुत्र संस्कृतसंबद्धं विविधविषयकं संशोधनं प्रचलति । आधुनिकविज्ञानेन सह प्राचीनभारतीय–चिन्तनस्य तुलनां कृत्वा भारतीयविज्ञानधारायाः महत्त्वं प्रतिपादयतां संशोधकानां संख्या च गरीयसी प्रतिभाति। अर्थशास्त्रस्य, वैमानिकशास्त्रस्य, कृषिशास्त्रस्य तदितरशास्त्रस्य च मौलिकविषयैः सह तुलना भवतु नाम परं तया सह प्राचीनविज्ञानस्य गरिमा नूनं प्रतिपादनीयः।

'योऽनूचानः स नो महान्' इत्युक्तादिशा भारतीयविद्यापरम्परा नवोन्मेषाय कल्पते इति नः विश्वासः । अत एव 'Tradition for Innovation' इति लक्ष्यं मनसि निधाय शोधकर्मणि वयं निरताः ।

लक्ष्यमिदं मनसि निधाय विद्वद्वरैः प्रवर्तितं संशोधनं शोधसंहिता–प्रकाशनद्वारा प्रतिवर्षं जिज्ञासूनां लाभाय प्रकाश्यते । अङ्केऽस्मिन् तादृशां शोधपूर्णलेखानां प्रकाशनं कृतम् । लेखाश्च विविधविषयकाः।

अङ्कस्यास्य वैशिष्ट्यमिदं वर्तते यत् ऐदंप्राथम्येन शोधच्छात्राणां लेखाश्च प्रकाश्यन्ते ।एतेन संशोधनक्षेत्रे शोधच्छात्रा अपि सोत्साहं प्रवर्तेरन् इति कामनैवात्र कारणम् ।

नवीनसंशोधकाः प्राप्तप्रेरणा अग्रे अस्यां दिशि प्रवर्तन्तामिति शुभकामना मे ।

Journal of
Kavikulaguru Kalidas Sanskrit University, Ramtek

Vol. V 2018-19

Topic	Author's Name	Pg. No.
अभिनवगुप्तस्य शैवदर्शनप्रभावितवाणीविचारः	प्रा. नन्दा पुरी	1
दिग्देशकालनिर्णयप्रणाल्यां भारतीयविचिन्तनानि ।	डॉ. जयकृष्णन् नम्पूतिरि एन्.डि.	8
कृपालुपदविचारः	डा.प्रियव्रतमिश्रः	15
कर्तृत्वनिर्णयः	अयाचित शन्तनु अम्बादासराव	18
''हलन्त्यम्'' सूत्रविषये कुचमर्दिनीस्थपण्डितराजमतपर्यालोचनम्	डॉ. पङ्कजकुमारव्यासः	22
महाराष्ट्रस्य वारकरीसम्प्रदायस्य स्वरूपं भक्तिसङ्कल्पना च	डॉ. रसाळ दिनेश पांडुरंग	28
रघुवंशमहाकाव्ये आलङ्कारिकसम्प्रदायाः	डॉ. पराग जोशी	43
वेदेषु कौटुम्बिकजीवनवर्णनम्	डॉ. शिवराम भट्टः	59
अपर्णजातकस्यानुपलब्धिविचारः	बर्ट्रम ग्रेगरि लियनगे	66
श्रीमद्भागवतपुराणेज्योतिःशास्त्रविषयाः	डॉ. एस. उमापतिः	73
कुन्तकाचा औचित्यविचार	डॉ. रेणुका बोकारे	81
प्रारम्भिक शिक्षण में ज्योतिर्गणित की प्रासंगिकता	डॉ. कृष्णकुमार पाण्डेय	88
Art of Ancient Indian Lexicography: An observation	Dr. Jaywant Chaudhari	96
Conceptualising Professional Humane teacher and Teacher Education	Anagha Ambekar	103
Lexicographical Contribution of the manuscript Halayaudha's Kavirahasya	Pallavi Kawale	108
Contribution of Raghuvansham in Student's Life	Rajendra D. Meshram Guide - Prof. Kavita S. Holey	118
Mridangacharya Paagaldas's 'Mridang-Tabla Prabhakar'- A theory into traditional kathak practice	Sunil R. Sunkara, Paullumi B. Mukheerjee, Guide- Dr Sandhya Purecha	136

संस्कृत
विभाग

अभिनवगुप्तस्य शैवदर्शनप्रभावितवाणीविचारः

प्रा. नन्दा पुरी

अभिनवगुप्ताचार्य एकः परिणतप्रज्ञः टीकाकारः। साहित्यशास्त्रस्य कृते तस्य महदवदानम् । साहित्यशास्त्रस्योपरि न तस्य स्वतन्त्रा ग्रन्थरचना । नाट्यशास्त्रस्याभिनवभारती ध्वन्यालोकस्य च लोचनटीका तेन रचिता । परं नाट्यशास्त्रस्य काव्यशास्त्रस्य चानुषङ्गेशन अनेकाः विषयाः स्वयंप्रज्ञेनाभिनवगुप्ताचार्येणात्र चर्चिताः। अभिनवभारत्यां चर्चिता रसप्रक्रिया, रसविघ्नविचारः लोचनटीकायां च सहृदयस्य लक्षणं, काव्यप्रयोजनविचारः, ध्वनितत्त्वनिरूपणे लावण्यस्य लक्षणं इत्यादयः विषयाः तस्य स्वयंप्रज्ञत्वस्य द्योतकाः। ध्वन्यालोकस्य मङ्गलाचरणस्य विवेचने अभिनवगुप्तेन तत्र ध्वनिप्रकाराः दर्शिताः । सार्वमेतत्तस्यैव बुद्धिविभवम् । आनन्दवर्धनस्य ध्वनिप्रतिष्ठापनायाः स्थिरीकरणं दृढीकरणञ्च प्रथममभिनवगुप्तेनैव साधितम् । अतिप्रदीप्त–प्रज्ञा, अलौकिकप्रतिभा गम्भीरं शास्त्रज्ञानं रसिकता चैते गुणाः अभिनवगुप्तस्यालौकिकत्वं दर्शयन्ति। व्याकरणन्यायमीमांसावेदान्ततन्त्रशास्त्रादिषु विषयेषु तस्य हस्तामलकवत्प्रभुत्वम्। प्रत्येकं शास्त्रस्य परिपूर्णज्ञानाय तस्य तस्य शास्त्रस्याधिकारिभ्यः गुरूभ्यः शास्त्राण्यधीताभिनवगुप्तेन । भट्टतौतः तस्य नाट्यशास्त्रस्य गुरूरासीत् भट्टेन्दुराजश्च साहित्यशास्त्रस्य।

अभिनवगुप्ताचार्यः शैवदर्शनस्याचार्यः। तस्य वंशे शिवभक्तिः परम्परयागता। प्रथमपूर्वजोऽत्रिगुप्तः पितामहः वराहगुप्तः पितां च नरसिंहगुप्तः एते विद्वांसः शास्त्रपण्डिताः शिवभक्ताश्चासन् । अभिनवगुप्ताचार्यः योगिनीभूरिति जनश्रुतिरासीत्। तेनैव शैवासिद्धान्तानां यथार्थज्ञानमवाप्तुं शैवसिद्धान्तानां प्रतिपादनञ्च कर्तुं स समर्थ इत्यपि धारणाऽसीत् । तेन तन्त्रालोकादिषु ग्रन्थेषु शैवसिद्धान्ताः प्रतिपादिताः । तस्य साहित्यिकग्रन्थेष्वपि शैवतत्त्वज्ञानस्य प्रभावः दृश्यते एव । अस्मिन् शोधग्रन्थे लोचनटीकान्तर्गतवाणीविचारः विवेचितः ध्वन्यालोकस्य चतुर्णामध्यायानामन्ते वाणीविषयकाः चत्वारः श्लोका उपलभ्यन्ते अत्र अभिनवगुप्ताचार्यः क्रमेण परां पश्यन्तीं मध्यमां वैखरीञ्च नौति ।ऐतेषु श्लोकेषु

शैवदर्शनस्य प्रभावं दर्शयितुं प्रयासोऽत्र कृतः।

ऋग्वेदे चतसृणां वाणीनां वर्णनमुपलभ्यते ।
चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचं मनुष्या वदन्ति।।

वाण्याः त्रीणि रूपाणि गुप्तानि तुरीयञ्च शब्दमयरूपं सर्वत्र प्रचलितम् । परावागिति वाण्याः सूक्ष्मातिसूक्ष्मं रूपम् ।तपस्विनः तां तपाचरणेन जानन्ति।वाण्याः साक्षाद्भवितुं योग्यरूपं 'पश्यन्ती' नाम्ना प्रसिद्धम्। पश्यन्ती वाण्याध्यात्मिकानुभूतेः साधनरूपां तां पश्यन्तीं भौतिकशब्दैः सह या योजयति सा मध्यमेत्युच्यते ।आस्मिन् जगति स्थूलरूपेण सर्वत्र प्रसृता वाणी वैखरी ।मुखस्थाने वैखरी कण्ठस्थाने मध्यमा उरस्थाने पश्यन्ती नाभिस्थाने च परावागित्येतासां वाणीनां स्थानानि।

ध्वन्यालोकस्य प्रथमोद्योतस्यान्ते लोचनटीकायाः प्रयोजनमभिनवगुप्तेनोक्तम् –

किं लोचनं विनालोके भाति चन्द्रिकयापि हि ।
तेनाभिनवगुप्तोऽत्र लोचनोन्मीलनं व्यधात्।।2

ध्वन्यालोकस्योपरि चन्द्रिका नाम्नि टीका केनापि विरचितासीता। इदानीमनुपलब्धा सा ।ध्वनेरालोकः चान्द्रिकयापि विना लोचनं द्रष्टुं न शक्यते ।अत एव एतया टीकया अभिनवगुप्तेन लोचनोन्मीलनं कृतमित्यर्थः । तदनन्तरं सः परां वाणीं नौति ।

यदुन्मीलनशक्त्यैव विश्वमुन्मीलयाति क्षणात् ।
स्वात्मायतनविश्रान्तां तां वन्दे प्रतिभां शिवाम् ।।3

शैवसम्प्रदायमनुसृत्य प्रतिभारूपशिवाख्या पराशक्तिः कूटस्थः परमशिवश्च। परमशिवायतने तस्मिन् विश्रान्तेयं शक्तिः स्वोन्मीनलसामर्थ्येन क्षणादुम्मीलयति विश्वम्। प्रत्युपसर्गपूर्वकभाधातोरूत्पन्नोऽयं प्रतिभाशब्दः । नास्त्यैषा स्वयं प्रकाशिता । अपि तु परमतत्त्वस्य प्रकाशेन प्रकाशितेयं प्रतिभा शक्तिशक्तिमतोरभेद इति न्यायेन परमतत्त्वेऽस्मिन्नेकाकारा तिष्ठति ।अत एव सा महेश्वर एव ।प्रत्यभिज्ञादर्शने प्रतिभायाः स्वरूपमुत्पलाचार्येणोक्तम्–

या चैषा प्रतिभा तत्तत्पदार्थक्रमरूषिता ।
अक्रमानन्ताचिद्रूपः प्रमाता स महेश्वरः।।4

विश्वनिर्मितिप्रक्रियायां यदा महेश्वरः स्वव्यक्तीकरणस्य कल्पनां करोति तदैषा शिवायतने विश्रान्ता निर्मितिसामर्थ्ययुता पराप्रतिभा विश्वमतुन्मीलयति । अस्यामवस्थायां सृष्ट्यन्तर्गताः सर्वे भेदाः तस्यां समाहिताः सन्ति।

काव्यनिर्मितिसन्दर्भे कवेः कवित्वशक्तिः कविहृदये विश्रान्तास्ति । कविरेव तस्याः आयतनम् । काव्यनिर्माणक्षमा सा प्रतिभा क्षणादन्यदेव काव्यविश्वमुन्मीलति । अभिवनगुप्ताचार्येण 'अपूर्वानिर्माणक्षमा प्रज्ञेति पञ्च तस्याः लक्षणं दत्तं लोचनटीकायाम्। रसावेशवैशद्यसौन्दर्यकाव्यनिर्माणक्षमत्वमित्येतेन 6 वचनेन तस्याः सामर्थ्यमप्युक्तम्। भट्टतौतेन प्रतिभायाः लक्षणं दत्तम्—

प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता ।
तदनुप्राणानाजीवद् वर्णनानिपुणः कविः ।।7

एषा प्रतिभा रसिकैर्नानुमीयमाना अपि तु तदावेशेन भासमानां स्वानुभवेन ज्ञातेत्यर्थः । लोचनटीकायाः मङ्गलाचरणे काव्यविश्वोन्मीलनप्रक्रिया अभिनवगुप्ताचार्येण स्पष्टीकृता—

अपूर्वं यद्वस्तु प्रथयति विना कारणकलां

जगद्ग्रावप्रख्यं निजरसभरात्सारयति च ।
क्रमात्प्रख्याप्रसरसुभगं भासयति यत् ।

सरस्वत्यास्तत्त्वं कविसहृदयाख्यं तत्त्वमुपादानकारणं विनाऽपूर्वं वस्तु निर्माति। स्वरसमयत्वेन पाषाणतुल्यं जगदिदं रमणीयं करोति । अत्र कवेरन्तर्गतकवित्वशक्तिरेव बाह्योपादानकारणं विना काव्यनिर्माणक्षमा । यथा शिवः स्वात्मनिष्ठशक्त्या जगदुत्पादयत्युपादानकारणं विना । प्रत्यभिज्ञादर्शनस्याचार्यः वसुगुप्तः वदत्यास्मिन्सन्दर्भे—

निरूपादानसंभारमभित्तावेव तन्वते ।
जगच्चित्रं नमस्तस्मै कलानाथाय शूलिने ।।9

क्षेमराजोऽपि वर्णयति—

चितिः स्वतन्त्रा विश्वसिद्धिहेतुः स्वेच्छया स्वभित्तौ विश्वमुन्मीलयति ।10

जगदुत्पत्तिकारणं शिवशक्त्याः ऐक्यं कालिदासेन रघुवंशस्य मङ्गलाचरणे उक्तम्।

वागर्थाविव संपृक्तौ वागर्थः प्रतिपत्तये ।

जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।।11

अत्रोपमालङ्कारेण वाण्याः सौन्दर्यमर्थस्यच गभीरत्वं व्यञ्जितम् । काव्यनिर्माणायेदं मङ्गलाचरणम् ।

आनन्दवर्धनोऽपि कविं प्रजापतिरूपेण वर्णयति ।
अपारे काव्यसंसारे कविरेक प्रजापतिः ।
यथास्मै रोचते विश्वं तथेदं परिवर्तयते ।।12

कविः प्रतिभाशक्त्या महाकवित्वमाप्नोति ।

आनन्दवर्धनानुसारं प्रतिभाशक्तिः ध्वन्यर्थस्पान्दितकाव्यकृतिमुत्पादयति । तेनैव कविः महाकवित्वमाप्नोति ।13

इयं प्रतिभा यथा कविह्रदये तथैव रसिकह्रदयेऽवि वर्तते । अत एवाभिनवगुप्तेन कविसह्रदयाख्यं सरस्वत्यास्तत्त्वमिति मङ्गलाचरणे उक्तम् ।अत्र कविः सह्रदयख्येत्यर्थः। तेन स्वाचार्यस्य भट्टतौतस्य मतमत्रोद्धृतम् – 'नायकस्य कवेः श्रोतुः समानोऽनुभवस्ततः।' राजशेरवरेणपि प्रतिभायाः प्रकारद्वयमुक्तम् कवेः कारयित्री प्रतिभा रसिकस्य च भावयित्री प्रतिभा ।

द्वितीयोद्योतस्यान्तेऽभिनवगुप्तः पश्यन्तीं वन्दते ।
प्राप्य प्रोल्लासमात्रं सद्भेदेनासूत्र्यते यया ।
वन्देऽभिनवगुप्तोऽहं पश्यन्तीं तामिदं जगत् ।।14

यया आनन्दमात्रसद्भावरूपं तत्त्वं वैचित्र्येण सह आसूत्र्यते उत्पत्तिपूर्वमेव जगत्स्वयञ्च पश्यन्तीं तामहं वन्दे इत्यर्थः अत्रास्फुटरूपं जगच्चित्रम् । यथा शक्तिः शिवस्य पुरतः अस्फुटरूपेण विश्वं प्रकटयति तथैव काव्यनिर्माणसन्दर्भे कवेः शक्तिरपि कवेः पुरतः काव्यविश्वं प्रकटयति ।अस्फुटत्वं विद्यतेऽत्र ।

तृतीयोद्योतस्यान्ते मध्यमां शिवप्रियां नौति अभिवनगुप्तः ।
आसूत्रितानां भेदानां स्फुटतापत्तिदायिनीम् ।
त्रिलोचनप्रियां वन्दे मध्यमां परमेश्वरीम् ।।15

सृष्टिनिर्माणप्रक्रियायामितः पूर्व पश्यन्त्यवस्थायां सृष्टिभेदा अस्फुटरूपाः । इदानीं मध्यमा शक्तिरासूत्रितानां भेदानां स्फुटतापत्तिदायिनी भवति । काव्यनिर्माणेऽपि कवेः पुरत इदानीं शब्दानां प्रतिमाः स्पष्टाः भवन्ति ।

चतुर्थोद्योतस्यान्ते तुर्याशक्तिं वैखरीं वन्दे इत्युक्तमभिनवगुप्ताचार्येण

स्फुटीकृतार्थवैचित्र्यबहिः प्रसारदायिनीम् ।
तुर्यां शक्तिमहं वन्दे प्रत्यक्षार्थनिदर्शिनीम् ।।16

या मनः चक्षोः पुरतः स्फुटीभूतान् पदार्थान् बहिः प्रसारयति प्रत्यक्षार्थं दर्शयति सा तुर्या वैखरी । तामहं वन्दे । अत्र सृष्टिनिर्मितिप्रक्रिया पूर्णताङ्गता । शब्दार्थयुक्ता वैखरी वाणीदानीं कविमुखाबहिः निःसरति ।

उद्योतारम्भेऽभिनवगुप्तः शाङ्करीं नौति ।एतया शक्त्यामहेश्वरस्यान्योप–करणं विना सर्जनक्षमत्वमत्रोक्तम्.

कृत्यपञ्चकनिर्वाहयोगेऽपि परमेश्वरः ।
नान्योपकरणापेक्षो यया नौमि शाङ्करीम् ।।17

एतया शक्त्या परमेश्वरः पञ्चविधकृत्यपूर्त्यर्थं नापेक्षतेऽन्य साधनानां साहाय्यम् । उत्पत्तिस्थितिलयतिरोधानानुग्रहैतानिपञ्च कृत्यानि । सर्वदर्शनसङ्ग्रहे स्पष्टीकृतान्येतानि कृत्यानि ।

पञ्चविधं तत्कृत्यं सृष्टिस्थितिसंहारतिरोभावः ।
तद्वदुग्रहकरणं प्रोक्तं सततोदितस्यास्य ।।18

मध्यमावस्थायां मनः चक्षोः पुरतः स्पष्टीभूतान् विविधपदार्थान् शब्दरूपेण बहिः निःसारयन्ती कविविचाराणां साक्षाद्दर्शनं कारयन्ती वैखरी वाणी ।

एवं ध्वन्यालोकस्य लोचनटीकायामभिनवगुप्तेन शिवशक्त्या ऐक्येन सह कवि–कविप्रतिभायाश्चैक्यं प्रतिपादितम् एतेन सृष्टिप्रक्रियायाः काव्यनिर्माणप्रक्रियाया अप्यैकं दर्शितम् ।

चतुर्ष्वध्यायेष्वभिनवगुप्ताचार्येण परापश्यन्तीमध्यमावैखरीभ्यः नमस्कारः कृतः। वाण्याः चतस्र शक्तय एव महेश्वरस्य जगदुत्पत्तेः कारणरूपाः शक्तयः । सृष्ट्युत्पत्तिप्रक्रियया सह काव्यनिर्माणप्रक्रिया समत्वं भजते । यथा –

1) सृजनशक्तिः शिवायतने विश्राम्यति या निर्मितिक्षमा शक्तिः शिवेनसह एकाकारा तिष्ठति सा परा प्रतिभेत्युच्यते ।अभिनवगुप्तेनास्याः परिभाषा प्रदत्ता –

अनन्यापेक्षिता चास्य विश्वात्मत्वं प्रति प्रभोः।
तां परां प्रतिभां देवीं संगिरन्ते ह्युत्तमाम् ।।19

कविसृष्टिप्रसङ्गे एषा प्रतिभेत्युच्यते । काव्यरचनायाः कारणभूतकवित्वशक्तिरेषा रसात्मककाव्योत्पादानक्षमा । रसास्वादनस्य कृते योगिनः कठोरं तपमाचरन्ति परं कविः सहृदयाश्च तं रसास्वादं विनायासं प्राप्नुवन्ति । अत्राभिनवगुप्तेन भट्टतौतस्य श्लोकः प्रदत्तः –

वाग्धेनुर्दुग्ध एवं हि रसं यद् बालतृष्णया।
तेन नास्य समः स स्यात् दुह्यते योगिभिर्हि यः।।20

2) शिवस्य सृष्ट्युत्पत्तेरिच्छया अस्फुटरूपा शक्तिः परिस्फुरति सृष्टिनिर्माणात्पूर्वमेव इयं शक्तिविश्वं पश्यति । अतः सा पश्यन्ती शक्तिः। अत्र भेदरहितं विश्वं तस्यां समाहितमस्ति । काव्यनिर्माणेच्छया कविप्रतिभा अपि अस्फुटरूपेण जागृता भवति । अत्र पश्यन्ती वाणी भेदरहितं काव्यविश्वं कवेः पुरत उपस्थापयति ।

3) शिवस्य मध्यमा शक्तिः तस्य पुरतः सभेदं विश्वं प्रकटयति । कवेः पुरतश्च मध्यमावाणी कल्पनानां शब्दानाञ्च प्रतिमाः सभेदं निर्माति ।

4) तुर्या शक्तिः स्फुटितान् पदार्थान् सभेदं बहिः प्रसारयति । सा प्रत्यक्षार्थ–निदर्शिनी वैखरी। स्फुटार्थशब्दरूपा वैखरी कविमुखाब्दहिर्निस्सरति।

5) उभयत्राप्येकरूपत्वमेकाकारत्वञ्च विद्यते । उपादानकारणविनैव सृष्ट्युत्पत्तिः काव्यनिर्मितिश्च भवति।

एवं शैवदर्शनस्य प्रभावः अभिनवगुप्तकृत लोचनटीकायां प्रतिपादित–वाणीविचारेषु दृश्यते ।

सन्दर्भसूचिः

1) ऋग्वेदः – 1.164.45
2) ध्वन्यालोकः (लोचनटीकासहित) पृ. 304
3) तत्रैव पृ. 304
4) सर्वदर्शनसंग्रहः – पृ. 310
5) ध्वन्यालोक लोचनटीका पृ. 147
6) तत्रैव पृ. 147
7) तत्रैव पृ. 149
8) ध्वन्यालोक लोचनटीका मङ्गलाचरणम् पृ. 1

9) सर्वदर्शनसंग्रह – पृ. 316
10) अभिनवगुप्त – पृ. 101
11) रघुवंशः मङ्गलाचरणम्
12) ध्वन्यालोक – उ.उ. 41, 42 वृत्तिः
13) ध्वन्यालोक – 1.6
14) ध्वन्यालोक लोचनटीका उद्योत–2 पृ. 587
15) तत्रैव उद्योत 3 पृ. 578
16) तत्रैव उद्योत 4 पृ. 681
17) तत्रैव उद्योत 4 पृ. 587
18) सर्वदर्शनसंग्रह
19) अभिनवगुप्त पृ. 102
20) ध्वन्यालोक लोचनटीका पृ. 146

सन्दर्भग्रन्थसूचिः

1) अभिनवगुप्त – ग.त्र्यं. देशपांडे, (हिंदी अनुवाद) अनुवादक मिथिलेश चतुर्वेदी साहित्य अकादमी दिल्ली. प्रथम संस्करण 1995

2) ध्वन्यालोक – अचार्य विश्वेश्वरशास्त्री, संपा. डॉ. नागेन्द्र ज्ञानमंडळ, लिमिटेड, वाराणसी, तृतीय संस्करण 1998

3) ध्वन्यालोक – पु.ना. वीरकर, प्रा. मा. वा. पटवर्धन, महाराष्ट्र राज्य साहित्य संस्कृती मंडळ, मुंबई, प्रथम खंड 1983, द्वितीय खंड 1989

4) सर्वदर्शनसंग्रह – माधवाचार्य, संपा. उमाशंकर शर्मा, चौखंबा विद्याभवन, वाराणसी.

■ ■ ■

दिग्देशकालनिर्णयप्रणाल्यां भारतीयविचिन्तनानि।

डा.जयकृष्णन् नम्पूतिरि एन्.डि.

आध्यात्मिकभौतिकविचारेष्वार्जितज्ञानमेव मनुजमन्येभ्यः जीविसमूहेभ्यः पृथक्करोति। तत् ज्ञानं तावत् मनुजः स्वबुद्ध्या परिश्रमेण च प्रत्यक्षीकृतं भवति। प्राप्तज्ञानस्य पुनर्विचिन्तनेन तस्य परिष्करणेन च ज्ञानस्य निर्मलतामायाति। प्रपञ्चे विद्यमानं सर्वमपि ज्ञानसञ्चयं बहूनां विद्वांसानां परिश्रमेणैव प्राप्तं भवति। तेषु भारतीयानां ऋषीणां विदुषां प्रयत्नः अन्यतमः। वैज्ञानिकक्षेत्रेषु विद्यमानः प्रथमः प्रयत्नः भारतीयानामेव स्यात्। अपौरुषेयात् वेदात् ज्ञानस्य प्रचुरः प्रचारः विचारश्च उद्भवति। वेदं सम्यगवगन्तुं वेदाङ्गानि उपकुर्वन्ति। तानि शिक्षा-कल्प-व्याकरण-निरुक्त-छन्द-ज्योतिषानीति षट्। तेषु वेदाङ्गेषु वेदोक्तकर्मणां समुचितकालसूचकं ज्योतिषं वेदपुरुषस्य नेत्रे इति कथ्यते।

भारतीयविचाराणां विभागेषु आकाशे स्थितानां समेषां वस्तूनाम् अध्ययनं ज्योतिश्शास्त्रे अन्तर्भवति। वैदिककाले यागादिवैदिकक्रियासु कालनिर्धारणे शास्त्रस्यास्य प्रवृत्तिरासीत्। जिज्ञासूनां ज्योतिश्शास्त्रविदुषां प्रयत्नेन कालक्रमेण शास्त्रस्यास्य सर्वतोन्मुखविकासः समजनि। सम्प्रति त्रिस्कन्धात्मकं षडङ्गयुक्तमिदं शास्त्रं लोके सर्वत्र विराजते। मानवजीवने अत्यन्तापेक्षितस्य दिक्-देश-कालानां त्रिप्रश्नानां विचारमपि ज्योतिश्शास्त्रान्तर्गतं भवति। यज्ञसंस्कारयात्रादिष्वनेकेषु विषयेषु एतेषां त्रिप्रश्नानां विचारः सुष्टु विचारणीयः भवति। अतः एव भारतीयैः ऋषिभिः विषयोऽयं सुष्टु चर्चितः। विषयेऽस्मिन् पाश्चात्यानां विचारः तावत् बहुवर्षानन्तरमेव उत्पन्नः। भारतीयानामाचार्याणां केचन विचाराः अत्र प्रत्यक्षीक्रियन्ते। भूमौ भूमध्यरेखातः प्रत्येकस्मापि देशस्य स्थानमवगन्तुम् अस्मदाचार्यैः ऋषिभिः उपायः प्रदत्तः विद्यते। तथैव भूमौ विद्यमानस्य प्रदेशस्य, तत्रस्थवातावरणानां च अध्ययनं सुस्पष्टतया तैः कृतमासीत्। एवमेव त्रुट्यादिसूक्ष्मकालानां, होरा-मास-वर्ष-दिव्यवर्ष-महायुगादिस्थूलकालानां च विस्तृता कालगणनापि तैः कृता आसीत्। तेषु केचन विचाराः अत्र प्राकाश्यन्ते।

दिग्देशकालविचारः

मानवजीवने सर्वदा सर्वथा अपेक्षितविषयोऽयम्। दिग्देशकालानां ज्ञानं मानवजीवने अत्यन्तापेक्षितं भवति। एतेषाम् अवगमनं विना आधुनिकानामेव न, पौराणिकानामपि जीवनं सुकरं न भवति। आधुनिके काले दिग्देशकालज्ञानाय अनेके उपायाः वर्तन्ते। तथैव पुरातने कालेऽपि एतेषामवगमनाय ऋषयः सम्यगचिन्तयन्। विषयेष्वेषु ते बहु विस्तरेण अध्ययनं चक्रुः। अत्र सूर्यसिद्धान्तः नाम ग्रन्थमाधारीकृत्य तेषु केचन विचाराः प्रतिपाद्यन्ते।

कालः

कलयति गणयति इति कालः। लोके विद्यमानान् सर्वान् मनुजान् पक्षिमृगादीन् पदार्थान् च सम्यगवगन्तुम् उपयोक्तुं च कालगणना अत्यन्तापेक्षिता। सर्वे जीविनः स्वीयरीत्या कालं गणयन्ति। तत्र मनुजैः विषयोऽयं सम्यग्विचारितः। कालगणना कथं कार्या, विभिन्नसन्दर्भेषु कथं तस्य विचारः कार्यः इत्यादयः अनेके विचाराः तैरालोचिताः। सूर्यसिद्धान्तानुरोधेन कालगणनाक्रमः अत्र लिख्यते। -

कालः द्विधा विभज्यते, लोकानामन्तकृत् कालः, कलनात्मकः कालः चेति। कलनात्मकस्य कालस्यैव विचारः अत्र क्रियते। सः कालः मूर्तः अमूर्तः चेति द्विधा भवति। व्यवहारे ग्रहणार्हः मूर्तः कालः स्थूलः, व्यवहारे ग्रहणानर्हः अमूर्तः सूक्ष्मः इति कथ्यते। त्रुट्यादयः सूक्ष्मः। सूच्या पद्मपत्रभेदनकालः त्रुटिरित्यभिधीयते। षष्टि त्रुटयः एकः रेणुः, षष्टि रेणवः एकः लवः, षष्टि लवाः एकं लीक्षकम्, षष्टि लीक्षकाणि एकः प्राणः। प्राणात् स्थूलकालगणना प्रारभ्यते।

सूच्या पद्मपत्रभेदनकालः	- त्रुटिः - १/३२,४०,००० सेकन्ड्स्
६० त्रुटयः	- १ रेणुः - १/५४,००० सेकन्ड्स्
६० रेणवः	- १ लवः - १/९०० सेकन्ड्स्
६० लवाः	- १ लीक्षकम् - १/१५ सेकन्ड्स्
६० लीक्षकाणि	- १ प्राणः -४ सेकन्ड्स्

सूच्या भिन्ने पद्मपत्रे त्रुटिरित्यभिधीयते।

तत्षष्ट्या रेणुरित्युक्तो रेणुषष्ट्या लवः स्मृतः।
तत्षष्ट्या लीक्षकं प्रोक्तं तत्षष्ट्या प्राण उच्यते।।[१]

अनेन ज्ञायते यत् अस्मत्पूर्वजैः एतादृशानाम् अतिसूक्ष्मसङ्ख्यानामपि गणना क्रियते स्म इति। तत्र तैरेवोच्यते - एषा सूक्ष्मगणना व्यवहारे योग्यः नास्तीति। अर्थात् अन्यत्र शास्त्रीयविषयकचिन्तनावसरे विदुषां मध्ये एव अस्य उपयोगः आसीत् इति। प्राणादयः स्थूलाः। प्राणादयः दैनन्दिनजीवने तस्मिन् काले उपयुज्यन्ते स्म। अधुनापि तादृशकालगणना एव अस्माभिः स्वीक्रियते। प्राणः नाम दीर्घाक्षरोच्चारणकालः अथवा सुखासीनस्वस्थपुरुषस्य एकशासोच्छ्वासार्थम् अपेक्षितः कालः। तदेव ४ सेकन्ड्स् इति कथ्यते। षट् प्राणाः एकः विनाडी। षष्टि विनाडिका एका नाडिका। षष्टि नाडिकाः एकमहोरात्रम्। ३० अहोरात्राणि एकः मासः। द्वादशमासाः एकं वर्षम्। एतावत् सामान्यगणना। कल्पादिविशेषकालविचारः इतः प्रारभ्यते। मानवानामेकं वर्षं नाम देवासुराणामेकमहोरात्रम्। तत् दिव्यदिनमिति कथ्यते। एवं ३६० सौरवर्षाणि एकं दिव्यवर्षम्। द्वादशसहस्रं दिव्यवर्षमेकं महायुगम्(चतुर्णां युगानां समूहः - महायुगम्)।

एकसप्ततिमहायुगानि एकं मन्वन्तरम्। एकैकस्य मन्वन्तरस्य कृतयुगमानं (४८०० दिव्यवर्षाणि) सन्धिः। ससन्धयः चतुर्दशमनवः कल्पः इत्यभिधीयते। कल्पद्वयं ब्रह्मणः एकमहोरात्रम्। एवं शतमहोरात्राणि तस्यायुः।[२] एवं प्रपञ्चस्य आद्यन्तकालनिरूपणं कृत्वा ग्रन्थारम्भकालोऽपि ग्रन्थकारेणै वं सूच्यते। - ब्रह्मणः आयुषः अर्धभागः व्यतीतः। तस्मात् प्रथमः कल्पः वर्तमानः। ब्रह्मणः एकविंशतितमे दिने, सप्तमे मन्वन्तरे, अष्टाविंशतितमे महायुगे, कृतयुगान्ते ग्रन्थोऽयं रचितः इति। सम्प्रति तस्मिन्नेव महायुगे कलियुगं प्रचलति।

६ प्राणाः	-	१ विनाडिका	-	२४ सेकन्ड्स्
६० विनाडिका	-	१ नाडिका	-	२४ मिनिट्स्
६० नाडिका	-	१ अहोरात्रम्	-	२४ अवेर्स्
३० दिनानि	-	१ मासः	-	१ मन्त्
१२ मासाः	-	१ वर्षम्	-	१ इयर्

१ वर्षम् - १ दिव्यदिनम्

३६० दिव्यदिनानि - १ दिव्यवर्षम् - ३६० इयर्

१२,००० दिव्यवर्षाणि - १ महायुगम् - ४३,२०,००० इयर्

(कृतयुगम् + त्रेतायुगम् + द्वापरयुगम् + कलियुगम् = महायुगम्

४८०० + ३६०० + २४०० + १२०० = १२,०००)

७१ महायुगानि -१ मन्वन्तरम् - ३०,६७,२०,००० इयर्

१४ मन्वन्तराणि + १५ सन्धि - १ कल्पः, १००० महायुगानि - ४३२,००,००,००० इयर्

२ कल्पः - ब्रह्मणः अहोरात्रम् - ८६४,००,००,००० इयर्

१०० अहोरात्राणि - ब्रह्मणः आयुः - ८६४,००,००,००,००० इयर्

एवं विस्तरेण कालगणनां कृत्वा सुलभतया उपयोक्तुं नवधा तस्य विभागोऽपि कृतः विद्यते।

ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं च गौरवम्।

सौरञ्च सावनं चान्द्रमार्क्षं मानानि वै नव।।[३]

अत्रापि अनेके विचाराः तैः कृताः वर्तन्ते। कालज्ञानाय स्वीकृताः पुरातनोपायाः भारते एव न। अन्येष्वपि केषुचिद्देशेषु कालज्ञानायोपयुक्तानां प्रविधीनाम् अवशिष्टानि दृश्यन्ते, यथा चिलि नाम राज्ये विद्यमान चङ्किलो ओब्सर्वेटर्। विस्तरभयात् अतिविस्तृतोऽयं विषयः दिङ्मात्रेणात्र उपस्थापिताः।

दिक्

दिग्ज्ञानं सर्वेषां जनानामप्यपेक्षितं भवति। तत्र सम्पन्नः ग्रामीणः नागरिकः इत्यादि कोऽपि भेदः न वर्तते। सर्वेषामपि जनानां विभिन्नकार्यलाभार्थं दिग्ज्ञानमपेक्षते। अतः लोके सर्वेष्वपि कालेषु अस्मै ज्ञानाय विभिन्नाः उपायाः स्वीकृताः भवन्ति।

स्थूलसूक्ष्मभेदात् दिशानिर्णयः द्विविधः। सामान्येन यात्रादिषु स्थूलदिशः गृह्यन्ते। तदर्थं यत्र सूर्यः उदयति तत् पूर्वदिक्, यत्रास्तं गच्छति तत्पश्चिममिति स्वीक्रियते। याज्ञिककुण्डमण्डपगृहदेवालयादीनां निर्माणे सूक्ष्मदिग्ज्ञानमावश्यकम्।

तदर्थं जलवत् समीकृतभूमौ वृत्तस्य लेखनं कार्यम्। तन्मध्ये एकः शङ्कुः स्थापनीयः। शङ्कोः छाया यदा वृत्ते स्पृशति तदा तत्र बिन्दुः स्थापनीया। प्रभातसूर्यछाया यत्र स्पृशति तत् पश्चिमा दिक्। मध्याह्नानन्तरं सूर्यछाया यत्र स्पृशति तत् पूर्वा दिक्। तन्मध्ये तिमिनां रेखां कृत्वा दक्षिणोत्तरा दिक् ज्ञातव्या। तद्वदेवाग्नेयादिदिशः साधनीयाः। इतोऽपि स्पष्टरूपेण दिग्ज्ञातुं वृत्ते विद्यमानछायायाः बिन्दुतः अयनानुसारं क्रान्त्यङ्गुलानि चालनीयानि। तदा स्फुटः दिक् प्राप्यते।

देशः

भूशास्त्रविदः देशान् ज्ञातुं सर्वदा प्रयत्नशीलाः भवन्ति। पुरातने काले अस्माकमाचार्याः अपि तदर्थं प्रयतन्ते स्म। देशानामवगमनं तावत् अक्षांशलम्बांशानामवगमनेन ज्ञायते। उत्तरसमस्थानात् उत्तरध्रुवपर्यन्तं याम्योत्तरवृत्ते अन्तरम् अक्षांशः इति कथ्यते। अक्षांशानामवगमनं तावत् पलभातः आनीयते।

पलभा - विषुवद्दिने मध्याह्नकाले द्वादशाङ्गुलशङ्कोः अङ्गुलात्मिका छाया पलभा इति कथ्यते। दिनरात्रिमानं समानं यस्मिन्दिने भवति तद्विषुवद्दिनमिति। तद्दिनमादौ मेषादौ तुलादौ चासीत्। अधुना तद्दिनं मीने कन्यायां च भवति। आङ्गलेयमासानुसारेण मार्च २१ अथवा सेप्टंबर् २२ भवति विषुवद्दिनम्।

विषुवद्दिने मध्याह्ने द्वादशाङ्गुलशङ्कोः अङ्गुलात्मिका छाया पलभा। तस्मादस्माभिरेवमक्षांशः आनीयते।

पलभा X ५ - पलभा[२] / १० = अक्षांशः

भूमध्यरेखायां पलभा न भवति। अतः सः प्रदेशः अक्षांशरहितप्रदेशः अपि भवति। यथा लङ्का।

एवमक्षांशादीनां ज्ञानम् एव न तैरार्जितम्, अपि तु भूमौ विद्यमानानां सर्वेषामपि देशानां सम्यगवधानं तेषामासीत्। सूर्यसिद्धान्ते भूगोलाध्याये विद्यमानमिमं श्लोकं तत् स्पष्टयति।

भगवन् किं प्रमाणा भूः किमाकारा किमाश्रया।
किं विभागा कथं चात्र सप्त पातालभूमयः।।[४]

तस्मिन् भूगोलाध्याये भूमेः स्थितिः, भूमौ किं किं वर्तते, सूर्यस्य प्रभावः प्रत्येकस्मिन् प्रदेशे काले काले कथं भवति, ऋतूनां स्वभावः कथं, दिनमाने रात्रिमाने च आधिक्यं ह्रासः च कदा जायते, तदैव भूमौ मासद्वयं मासत्रयं मासषट्कं यावत् दिनं, तावत् प्रमाणरात्रिश्च केषु प्रदेशेषु भवतीत्यादि विचाराणां सुष्टु अध्ययनं कृत्वा समीचिनसमाधानानि प्राप्यन्ते।

मेरौ मेषादिचक्रार्धे देवाः पश्यन्ति भास्करम्।
सकृदेवोदितं तद्वदसुराश्च तुलादिगम्।।[५]

इत्येवमस्माकं ज्योतिर्विद्भिराचार्यैः गणितशास्त्रपण्डितैः भूमेः तथा गगने विद्यमानानां प्रकाशयुक्तनक्षत्राणाम् अप्रकाशितपिण्डानाम् अन्येषां पदार्थानां च विषयेषु सम्यगध्ययनं क्रियते स्म। दिग्देशकालविषयप्रतिपादितानेकग्रन्थाः तालपत्राणि च अधुना उपलभ्यमानानि सन्ति चेदपि तेषाम् अध्ययनं कृत्वा तत्रोक्तविषयानवगन्तुं सामर्थ्यमस्माकं नास्ति। अस्ति चेदपि तस्मिन् परिश्रमः न क्रियते इत्यदेव खेददायकविषयः। संस्कृतभाषायां विद्यमानतालपत्राणां सुष्टु अध्ययनेन तत्रोक्तविषयाणां परिष्करणेन च संस्कृतस्य संस्कृतेः च सामर्थ्येन लोकराष्ट्राणाम् उपरि विद्यमानः भारतस्य यशः इतोऽपि वर्धयितुं प्रयतामहे।

सूचिका

१. सूर्यसिद्धान्तः - १२ श्लोकस्य व्याख्या।
२. सूर्यसिद्धान्तः १- १० - २१ तः ।
३. सूर्यसिद्धान्तः १४-१
४. सूर्यसिद्धान्तः-भूगोलाध्यायः-२
५. सूर्यसिद्धान्तः - भूगोलाध्यायः - ६७

ग्रन्थसूची

१. सूर्यसिद्धान्तः - व्याख्याता-श्री कपिलेश्वरशास्त्री, चौखम्भा संस्कृत भवन्, वाराणसी, २००६.

२. सिद्धान्तशिरोमणिः - भास्कराचार्यः, चौखम्बा संस्कृत सीरिज, बनारस,

३. बृहत्संहिता - वराहमिहिरः, व्याख्याता-पुलियूर् पि.एस्.पुरुषोत्तमन् नम्पूतिरि, देवी बुक्स्टाल, कोटुङ्ङल्लूर्, केरला, २००१.

४. बृहज्जातकम् - वराहमिहिरः, व्याख्याता-केदारदत्त जोशी, मोत्तिलाल् बनारसीदास, दिल्ली, २००२.

■ ■ ■

कृपालुपदविचारः

डा.प्रियव्रतमिश्रः

वाङ्मुखम् –

१ सप्तद्वीपा वसुमती, त्रयो लोकाः, चत्वारो वेदाः, साङ्गाः सरहस्याः .... इत्येतावान् खलु शब्दस्य प्रयोगविषयः ताननन्नुनिशम्य शब्दोऽयं दुष्ट इति कथनन्तु नूनमेव साहसमात्रम् । परं लोके तादृक्षाः नैके शब्दाः नयनपथमारूढा भवन्ति येषां प्रकृतिप्रत्ययविभागे तस्य साधुत्वासाधुत्वविचारावसरे च क्लिश्नन्ति तत्प्रयोक्तारः।

तादृशश्शब्दोऽयं कृपालुः इति । लोके शब्दस्यास्य प्रयोगो बाहुल्येन दृश्यते, किं बहुना स्तोत्रादिषु तु भृशं दरीदृश्यते । यथा – श्रीमद्गोस्वामितुलसीदासकृतश्रीरामचन्द्रस्तुतौ आद्ये पद्य एव **२ "नमामि भक्तवत्सलं कृपालुशीलकोमलम्"** इत्यत्र दृश्यते कृपालुशब्दः । सत्यपि प्रयोगप्राचुर्ये कथंकारन्नु पदमिदं निष्पद्यते ? कः खलु विग्रहः? कश्च प्रकृतिप्रत्ययविभाग इति नैके शङ्काकलङ्कपङ्काः मनोमालिन्यं वितन्वन्ति । तदत्र शब्दस्यास्य साधुत्वविषये मनाक् प्रस्तुमः।

अष्टाध्याय्याः तृतीयाध्यायस्य द्वितीयपादस्य अष्टपञ्चाशदुत्तरैकश्शततमं सूत्रमिदं **३"स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्"** इति । सिद्धान्तकौमुद्यान्तु पूर्वकृदन्तप्रकरणे विद्यते सूत्रमिदम् । सूत्रेणानेन स्पृहि–गृहि–पति–दयि–निद्रा–तन्द्रा–श्रद्धा एभ्यः सप्तभ्य आलुच्विधीयते तच्छीलादिष्वर्थेषु । तेन स्पृहयालुः गृहयालुः इत्यादयः शब्दाः निष्पद्यन्ते । सूत्रेऽस्मिन् "कृपा" शब्दो न निर्दिष्टो येन खलु आलुच्स्यात् । असति चालुचि कथंकारं कृपालुः इति स्यात् । ततः विचार्यमाणे अग्रिमे वार्त्तिके **४"शीङो वाच्यः"** इत्यत्र शीङ्धातुः निर्दिष्टः एवञ्च शयालुरिति पदं स्यात् । ततः आलुच्विधायकं सूत्रं नान्यत्रोपदिष्टं न वा वार्त्तिकम् । एवं तर्हि कथंकारं "कृपालुः" इति पदं लोके प्रयुज्यतेतराम् ?

अत्र किञ्चित् प्रस्तुमः—

कृपां लाति इति विग्रहे ५**"मृगय्वादयश्च"** इति, उणादिसूत्रेण कुप्रत्ययो निपात्यते । "ला" आदाने इति, धातुरत्र । एवञ्च कृपादानं करोतीत्यर्थः । अमरकोशस्य "रामाश्रमी" टीकायान्तु ६मितद्र्वादित्वादत्र "डु" प्रत्ययो विधीयते इत्यभिहितम् । तत्र मितद्र्वादयः के? इति विचार्यमाणे मितद्रुः, शतद्रुः, शम्भुः इत्येते शब्दाः उदाहरणतया प्रदर्शिताः । कृपालुशब्दस्य तस्मिन् गणेऽनन्तर्भावाद् न स्याद् डुप्रत्ययः । न वा एष गण आकृतिगणः । तर्हि कथं स्याद् डुप्रत्ययसमन्वितः कृपालुशब्दः । न्यासे तु ७ "अन्येभ्योऽपि दृश्यते" इति, सूत्रात्दपि शब्दोऽध्याह्रियते "अपि" इत्यनेन अन्येभ्यो धातुभ्योऽपि ''डु'' विधीयते इति समाहितोऽयं तेन कृपालुः स्पर्धालुरित्यादयः शब्दाः निष्पद्यन्ते । एवञ्च कृपां लातीत्यर्थे लाधातोः डुप्रत्यये कृपालुशब्दो निष्पद्यते इति समर्थयितुं शक्यते ।

१) माधवीयधातुवृत्तौ— ''ला'' आदाने यः कृपामादत्ते इति कृपालुः मितद्र्वादित्वाड्डुः इत्यात्रेयः इति दर्शितम् ।

२) तत्त्वबोधिन्याम् — ननु कथं कृपालुः स्पर्धालुरिति ? कृपां स्पर्धां च लातीति विग्रहे मृगय्वादित्वात् कुः । अर्थाद् " मृगय्वादिभ्यश्च" (उ— 1/39) इति, उणादिसूत्रेण मृगयुगणम् आकृतिगणं विभाव्य तत्र कृपालुः इत्यस्यान्तर्भावः इति ।

३) शब्दकल्पद्रुमे — कृपालुः — कृपां लाति आदत्ते । ला+डुः । यद्वा कृपा विद्यते अस्य अस्मिन् वा कृपा आलुच् इति । एतस्य मूलं "बहुलं छन्दसि" (५/२/१२२) इति, सूत्रस्थं वार्त्तिकम् — "हृदयाच्चालुरन्यतरस्याम्" इति " शीतोष्ण—तृ—प्रेभ्यः तन्न सहते" इति च वार्त्तिकम् । पूर्ववार्त्तिकात् "सर्वत्रामयस्य" इत्यस्मात् "सर्वत्र" इत्यनुवर्तते । तेन लोके वेदे चेति सिद्धम् । ''बहुलं छन्दसि'' इति, सूत्राद् "बहुलम्" इत्यनुवर्तते । तेन आलुप्रत्ययः अन्यत्रापि भवति । तथा च कृपालुः (कृपा अस्ति अस्य अस्मिन् वा) इति सिद्धम् ।

यद्यपि सर्वमिदं समाधानदृष्ट्या साध्वेव द्वितीयं समाधानं विहाय । द्वितीयसमाधाने आचार्यप्रवृत्तेः विरोधो दृश्यते । तद्यथा— " मृगय्वादिभ्यश्च"इति सूत्रात्पूर्वं कुप्रत्ययविधायकाः इमे योगाः सन्ति — 8"हरिमितयोर्द्रुवः" 9"शते च" १०"खरुशङ्कु—पीयु—नीलङ्गु—लिगु" ११ "पिबतेरीत्वं युगागमश्च" ।

एतेषु सर्वेषु सूत्रेषु कुप्रत्ययं विहाय निपातनद्वारा अन्यानि कार्याण्यपि साध्यन्ते । परन्तु "मृगय्वादिभ्यश्च" इति सूत्रे समानान्तानि पदान्येवाभिप्रेतानि सूत्रकृता इति, विभावयितुमस्ति निदानम् । अत एव भट्टोजिदीक्षितेनापि

समानान्तान्युदाहरणान्येव प्रदर्शितानि मृगयुः, देवयुः, मित्रयुः इत्यादीनि । अतः इदं समाधानमाचार्यप्रवृत्तेर्विरुद्धं दृश्यते ।

इतराज्यपि समाधानानि भाष्याशयविरुद्धानि । भाष्ये "स्पृहिगृहि..... (३/२/१५८) इति, सूत्रे विचारः कृतः । स च इत्थम् – दृ किमर्थम् आलुच् इति महान् प्रत्ययो विधीयते लुश् (लुश् इत्यत्र लकारलोपः न चिन्तनीयः यतः लुप्तयकारनिर्देशः अर्थात् "(य)लुश्" अथवा लकारलोपस्य प्रयोजनाभावाद् इति कैयटे दर्शितत्वात्) इत्येव प्रत्ययो भवतु इति, आशङ्क्य का रूपसिद्धिः इति प्रश्नः कृतः । तस्योत्तरम् – स्पृहयालुः, दयालुः इति उक्तम् । तदुपरि भाष्यकार आह – इदं च रूपं स्पृहि इत्यस्माद् लुश्प्रत्यये ततः शपि (तिङ्परत्वाभावेऽपि सार्वधातुकत्वात् शप् भवितुमर्हति) "अतो दीर्घो यञि" इति दीर्घे स्पृहयालुरिति सिद्धम् । किमर्थं तर्हि महता प्रयत्नेन आलुच्विधीयते इत्याशङ्क्य – एवं सिद्धे सति पुनः महता प्रयत्नेन आलुच्विधानम् अन्येभ्योऽपि आलुच् भवतीति ज्ञापनार्थमिति समदधाति । तत्र पुनः एतस्य ज्ञापनस्य किं प्रयोजनमिति पृष्ट्वा अग्रे वार्तिककारो वक्ष्यति "आलुचि शीङ्ग्रहणम्" इति, तन्न वक्तव्यं भवति । अर्थात् एतेन भाष्यकृतः मतं कृपालुः स्पर्धालुरित्यादीनि रूपाणि "अन्येभ्योऽपि दृश्यते" इति सूत्रेणैव सिद्ध्यतीति स्पष्टम् । अन्यत् सर्वं समाधानं यद्यपि साधुः तथापि भाष्याशयानुसारेण न वर्तते अथवा तस्यैव प्रपञ्च इत्येव सिद्धान्तः । एतत्सर्वं यत्किञ्चित् प्रपञ्चितं तत्सर्वमस्माकं गुरूणां निरवधिकानुग्रहेणैव फलितम् । यदत्र ग्राह्यं तत्गुरूणां (आचार्यरामानुजदेवनाथवर्याणाम्) कृपैव । यदत्रासौष्ठवं तन्मे बुद्धिमान्द्यमित्यलं पल्लवितेन ।

सन्दर्भाः –

१. महाभाष्यम् – पस्पशाह्निकम्
२. स्तोत्ररत्नावली, श्रीरामचन्द्रस्तुतिः(गीताप्रेस, गोरखपुर)
३. अ ३/२/१५८
४. वा.२१४०
५. कृ १/३७
६. वा. २१५२
७. ३/२/१७८
८. कृ१/३४
९. कृ १/३५
१०. कृ१/३६
११. कृ १/३६(अ)

■ ■ ■

कर्तृत्वनिर्णयः

अयाचित शन्तनु अम्बादासराव

यः यद्गुणप्रधानः स तद्गुणविशिष्टः इति कथ्यते । यतः यद्गुणविषिष्टः स तद्गुणानुरूपकर्मानुष्ठाता भवति । तदा एव तस्मिन् गुणोपाधिसम्बन्धे सति कर्तृत्वमारोप्यते । कर्तृत्वारोपो हि कर्तृत्वनिर्णयः । स च विचिकित्सितविषयगत विचिकित्सानिवारणाय कर्तव्य एव इति अयमारम्भः ।

कर्तृत्वमेवात्र विचिकित्सितं वर्तते । आत्मा कर्ता भवति आहोस्वित् प्रकृतिरिति संशयः । किमत्र संशयबीजमिति चेत् – आत्मनः कर्तृत्वभोक्तृत्वादिनिषेधवादिन्यः श्रुतयः स्मृतयश्च उपलभ्यन्ते ताः यथा,

''अस्थूलमणन्वह्रस्वमदीर्घम्......'' (बृ.उ.3.8.8)

''तस्य कर्तारमपि मां विध्यकर्तारमव्ययम्...'' (भ.गी. 4.13) इत्याद्याः ।

अत कर्तृत्व भोक्तत्व रहितस्य आत्मनः कर्तृत्वं न वक्तुं युक्तम् । साङ्ख्यादि सिद्धान्तेपि भोक्तृत्वस्य इष्टत्वेपि कर्तृत्वमात्मनः नेष्टम् । अतः आत्मा अकर्ता एव । ''तयोरन्यः पिप्पलं स्वाद्वत्ति'' इत्याद्या श्रुतिरपि आत्मनः भोक्तृत्वमेव वर्णयति न कर्तृत्वमिति स्थिरम् ।

प्रकृतेरस्तु कर्तृत्वादिकं तच्च साङ्ख्यादिमते अप्यविरुद्धमिति चेत् तथापि वेदान्तनये तु अचेतनायाः प्रकृतेः कर्तृत्वादिकं न संभवति ।

भगवद्वाक्यञ्चात्र विरुध्यते –

''प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।'' इति ।

अतः प्रकृतेरेव कर्तृत्वं स्यादिति भावयामः । तथा सति अचेतनायाः केवलायाः प्रकृतेः कर्तृत्वं सम्भवति इति वदतो व्याघातः ।

न च तद्गौणमिति वाच्यम्, भगवदुक्तेः गौणता कल्पने शास्त्रहानिप्रसङ्गः, सत्यत्वावधारणे अनुभवविरोधश्च अतः कर्तृत्वं कस्य इति संशये अपाकरणीये उच्यते–

कर्तृत्वं तावत् शरीरपञ्चराध्यक्षस्य जीवस्यैव इति । नात्र केवलस्य आत्मनः कर्तृत्वं सम्भवति । न च केवलस्य प्रधानस्य । प्रधानमाश्रित्यैव आत्मनि कर्तृत्वारोपः प्रसज्यते । उक्तश्च—

''तद्‌गुणसारत्वात् तद्‌व्यपपदेशः प्राज्ञवत्'' (ब्र. सू. शा. भा. 2.3.13.29 पृ. 536)

इत्यादि सूत्रेण तथैव ''तस्याः बुद्धेः गुणास्तद्‌गुणा इच्छा द्वेषः सुखं दुःखमित्येवमादयः तद्‌गुणाः सारः प्रधानं यस्यात्मनः संसारित्वे सम्भवति, स तद्‌गुणसारः, तस्य भावः तद्‌गुणसारत्वम्'' (तत्रैव पृ 538)

अतः संसारयोगी जीव एव बुध्द्युपाधिपरिच्छिन्नः कर्ता ।

केवलस्य आत्मनः निर्गुणस्य गुणवत्त्वादिनिमित्ताः दोषाः न प्रसज्यन्ते । न च प्रधानस्य केवलस्य दोषवतः अपि चेतनसंयोगाभावात् तादृशं कर्तृत्वादिरूपं सामर्थ्यमुपपद्यते । इत्थमङ्‌गीकारे पङ्‌ग्वन्धन्यायेन साङ्‌ख्यशास्त्रप्रतिपादितमेव प्रतिपादनं कृतमिति सिद्धसाधनता स्यात् । इतश्च बुद्धेः कर्तृत्वं ग्राह्यं, नात्मनः उदासीनत्वात् । प्रकृतेस्तु गुणत्रयवैषम्ययोगे उत्पत्यादिव्यापारस्य सम्भाव्यमानत्वात् न वेदान्तमतमत्र विशेषतां भजते इति स्यात् संशयः—

तत्रोच्यते, अचेतनं प्रधानं जगत्कारणं न भवति इति अशब्दत्वेन हेतुना एव प्रथमम् ''ईक्षत्यधिकरणे'' निराकृतं, ततश्च रचनानुपपत्त्यधिकरणे अपि अनुमानं न जगद्रचनां कर्तुं प्रभवतीति उक्तम् । अतः अनुमाननस्य अशब्दस्य प्रधानस्य न जगद्रचनाहेतुत्वम् । साङ्‌ख्यकृतानामाक्षेपानां च श्रुतिप्रमाणबलेन गतार्थतामभिसन्धाय उदासीनस्यापि आत्मनः उपाधिसम्बन्धात् सम्भवतीति ब्रूमः ।

तदपि न परमार्थतः अपि तु व्यवहारतः इति । उक्तं च ''कर्ता शास्त्रार्थवत्वात्'' (ब्र.सू.शा.भा. 2,3,14,33, पृ. 54) इति ।

विधिशास्त्रस्यार्थवत्ता जीवस्य कर्तृतायामेव संभवति । न च जीवः उत्पद्यते अतः पृथक् तत्वात्मना चेतनोपि सन् ग्राह्यः । न चोत्पद्यमानत्वेन हेतुना ब्रह्मणः तात्विकत्वग्रहणम् अपि तु अनुत्पद्यमानत्वात् नित्यत्वादेव । जीवः नोत्पद्यते इत्यस्मद्वचनस्य नित्य इति अभिप्रायः । नित्यत्वञ्चापरिच्छिन्नस्यैव भवति इति अतः उपाधि सम्बन्धादुपाधिगतधर्मानुसारीव ज्ञायमानोपि नित्यः ब्रह्मस्वरूप एव जीवः। तस्माज्जीवब्रह्मणोः अभेद एव । अतः ''अनेन जीवेन आत्मना अनुप्रविश्य नामरूपे व्याकरवाणि'' इति श्रुत्या ब्रह्मणः शारीरात्मकता व्यपदेशे अपि न तत्र सोपाधिकस्य

कर्तृत्वादि व्यतिरेकः प्रसज्यते । स्यादेतत् । ''यजेत, जुहुयात्'' इत्यादि विधिशास्त्रस्य अर्थवत्ता चेतनं प्रति क्रियमाणे विधाने एव सम्भवति । अचेतनां बुद्धिं बोधयत् शास्त्रं व्यर्थमेव स्यात् । न हि कश्चित् पिता मृतं पुत्रं शिष्यं वा अचेतनशरीरात्मना एव अवशिष्टं समुपस्थितं विधिशास्त्रमुखेन किञ्चित् बोधयति । चेतन एवात्र बोध्यते नाचेतनः । न चाचेतनो वा बोधयति। अचेतनं शरीरमाश्रित्य चेतन एव विधिविधानं करोति । अतः चेतनस्यैव बोध्यबोधनादि व्यापारः सम्भवति । बोधनादिरूपा क्रिया, तत्कर्तृत्वञ्च उपाधिपरिच्छिन्ने चेतने एव संभवति । अतः स कर्ता इति स्थिरम् ।

यदुक्तं ''प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः'' इति भगवद्वाक्यविरोध इति तदयुक्तम् । भगवद्वाक्यमिदं कर्मयोगाध्याये पठितम् । साधकानुग्रहार्थमेव भगवान् युक्त्या तथा आह । साधकः आत्मनि जायमानं कर्तृत्व लेपं कथञ्चित् दूरं क्षिपेत् । तदा अकर्तृत्वबुद्धिः दृढा भविष्यति । मिथ्याभूत कर्तृत्वाद्यभिमानरूपाज्ञानविनाश एव तु मोक्षः । अतः इदमेव किल मोक्षमार्गं प्रति प्रस्तितस्य कृते बोधनीयम् । वक्ष्यति च भगवान् नवमे ''मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।'' (भ.गी. 9.11) इति । अतः प्रकृतिमाश्रित्य स्थितस्य चेतनस्यैव कर्तृत्वम् । न चोपाधिना असंहतस्य, न चोपाधिमात्रस्य । चेतनाधिष्ठितं ह्येवाचेतनं प्रवर्तते । अतः यच्चैतन्यं येन गुणेन संम्बद्धं सत् कर्ततां भजते तद्गुणविशिष्टं तदिति उच्यते । तद्गुणानुरूपकर्मकृत् च भवति । तर्ह्यत्र किं कर्तृत्वं किं परमार्थतः उत न इत्यत्र अज्ञानोपाधिनिवृत्तिं यावत् सत्यमिति वाच्यम् । ''अहङ्कारविमूढात्मा कर्ताहमिति मन्यते'' इत्युक्तत्वात् कर्तृत्वस्य चारोपितस्य त्यक्तुमिष्टतमत्वात् । न च परमार्थरूपं कश्चित् त्यक्तुं प्रभवति । यदि परमार्थतः कर्तृत्वं स्यात्तर्हि न जह्यात् । जहाति च अतस्तदनृतमेवेत्यवधारणीयम् ।

ननु परमेश्वरस्यापि सोपाधिकस्य जगदुत्पत्तिस्थितिलयकर्तुः कर्तृत्वनिमित्ता कर्तृता प्राप्ता । तथा सति तस्यापि जीवत्वं स्यादिति चेत्इष्टापत्तिः, परमेश्वरोपि कश्चिज्जीवः इति चिन्त्यमाने नास्माकं विप्रतिपत्तिः। केवलं जगदुत्पत्तिस्थितिलयकर्तृत्वरूपः महान् विशेषः मुक्तेषु अननुवर्तमानः ''जगध्द्यापाराधिकरणे'' विनिर्णीते ईश्वरे, जीवात्मके कल्पनीयः । सर्वं मायिकमिदम् । मायायां सर्वमसङ्गतमपि सङ्गतमिव भवति ।

चैतन्यस्य उपाधिसम्पर्कः अनृतः इति उक्तत्वात् एव तस्य असंगस्य सङ्गित्वादि निमित्तः आक्षेपः परिहृतः भवति ।

अन्यदपि वेदान्तेषु ''आत्मा वा अरे द्रष्टव्यः'' (बृ.उ. 2.4.5)

इत्यादि श्रुतिषु समाधिः उपदिष्टः। स च समाधिः धारणाध्यानसमाध्यात्मकः योगोक्तः संयम एव । अतः समाध्युपदेशादपि कर्तृत्वं जीवस्यैव ग्राह्यम् । अतः जीव एव कर्ता इति कर्तृत्वनिर्णयः सम्पद्यते इति शम् ।

संदर्भ ग्रन्थ सूची –

1. भ. गी.
2. बृ. 3
3. ब्र. सू. शा. भा.

■ ■ ■

''हलन्त्यम्'' सूत्रविषये कुचमर्दिनीस्थपण्डितराजमतपर्यालोचनम्

डॉ. पङ्कजकुमारव्यासः

तत्राष्टाध्याय्यां प्रथमाध्याये तृतीयपादे तृतीयं सूत्रं भवति ''हलन्त्यम्'' (पा. सू. 1–3–3) इति ।सूत्रार्थस्तु उपदेशेऽन्त्यं हलित्स्यादिति ।परन्तु ''हलन्त्यम्'' इति वाक्यार्थज्ञानं हल्पदार्थावगमोत्तरमेव भवितुमर्हति, वाक्यार्थज्ञानस्य पदार्थज्ञानं विनाऽसंभवात् । हल्पदार्थज्ञानं तु ''आदिरन्त्येन सहेता'' (पा.सू. 1–1–71) इति सूत्राधीनम् । तद्धि हल्संज्ञा हलिति माहेश्वरसूत्रे लकारस्येत्संज्ञायां सत्याम् ''आदिरन्त्येन सहेता'' (पा.सू. 1–1–71) इति सूत्रेण वाच्या । हलिति सूत्रे लकारस्येत्संज्ञा च ''हलन्त्यम्'' इति सूत्रेण वाच्या । एवञ्च हलिति सूत्रे लकारस्येत्संज्ञायां सत्यां ''आदिरन्त्येन'' इति हल्संज्ञासिद्धौ ''हलन्त्यम्'' इति सूत्रप्रवृत्तिः, ''हलन्त्यम्'' इति सूत्रेण हल्सूत्रे लकारस्येत्संज्ञायाम् ''आदिरन्त्येन'' इति हल्संज्ञासिद्धिः इत्येवं ''हलन्त्यम्'' ''आदिरन्त्येन'' इत्यनयोः सूत्रयोः परस्परसापेक्षत्वे नास्त्यन्यो न्याश्रयत्वम् । अन्यो न्याश्रयत्वञ्च तज्ज्ञानाधीनज्ञानाधीन– ज्ञानविषयत्वमिति । प्रकृते हल्पदार्थज्ञानाधीनम् इत्पदार्थज्ञानम्, इत्पदार्थज्ञानाधीनं हल्पदार्थज्ञानमिति परस्परासापेक्षत्वादन्योन्याश्रयत्वात् सूत्रायोरनयोर्बाधाभावात् सूत्रयोरप्रवृत्तिरूपदोषः । तत्र वैयाकरणशिरोमणिः श्रीमद्भट्टोजिदीक्षितः सिद्धान्तकौमुद्यां1 ''हलन्त्यम्'' इति सूत्रावृत्तिं विधाय दोषमिमं परिहरति ।तदित्थं – ''हलन्त्यम्'' इति, आवृत्तमेकपदं सूत्रम् । अत्र हल्पदं सूत्रपरम् । ''उपदेशेऽजनुनासिक इत्'' इत्यतः इदित्यनुवर्तते । ततः सूत्रार्थः – हलिति माहेश्वरसूत्रे अन्त्यं लकार इत् स्यात् । तेन हल्सूत्रे लकारस्य हल्संज्ञामनुपजीव्यैवेत्संज्ञा सिद्धेति नान्योन्याश्रयः । इदानीमित्पदार्थज्ञानोत्तरम् अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यादित्यर्थकस्य हल्संज्ञाविधायकस्य ''आदिरन्त्येन सहेता'' इति सूत्रस्य प्रवृत्तिर्निर्बाधा। तथा हि – अन्त्येनेता लकारेण सहित आदिर्हकारादिवर्णः मध्यगानां यवरलानां स्वस्य हकारस्य च हल्संज्ञां लभते ।अनेन हल्पदार्थसिद्धिः । ततः हल्पदार्थे ज्ञाते उपदेशेऽन्त्यं

हलित्स्यादित्यर्थकस्य ''हलन्त्यम्'' इति, अष्टाध्यायीस्थसूत्रमपि निर्बाधप्रवृत्तिरर्हम् । अनेन चतुर्दशसूत्र्यामुपदेशे विद्यमानानां णकाराद्यन्तहल्वर्णानामित्संज्ञा सिद्धा । एतत्सर्वं विस्तरेण व्याख्याति दीक्षितः सिद्धान्तकौमुदीव्याख्या प्रौढमनोरमायाम्[2] । तत्र भवान् विद्वन्मणिः पण्डितराजोपाधिविभूषितः श्रीमज्जगन्नाथः स्वरचितप्रौढमनोरमाखण्डनग्रन्थे मनोरमाकुचमर्दिन्यां विप्रतिवदते 'हलन्त्यमि' ति सूत्रावृत्तिं दूषय ।तथा हि–

कुचमर्दिन्यां भट्टोजिमतमुपन्यस्य तत्खण्डनम् – ''अत्रेदमवधेयम् – सूत्रावृत्तिरियमतितमामयुक्तैव पाणिनिसूत्रन्यासविरुद्धत्वाद् गौरवाच्च । कथं तर्हि अनुपपत्तिपरिहार इति चे ? इत्थम् ''हल्'' इत्येकं सूत्रम् ''अन्त्यम्'' इति चापरम्, तत्र द्वितीयसूत्रे मकारात्परतो ल् इति व्यञ्जनं संयोगान्तलोपेन लुप्यते, उपदेशे इति इदिति चानुवर्तते, तेन उपदेशेऽन्त्यं ल् इत् स्यादिति वाक्यार्थेन णलादिलकारसाधारण्येन हल्सूत्रान्त्यलकारस्येत्संज्ञायां सत्यां हल्प्रत्याहारसिद्धौ हलिति प्रथमवाक्यार्थधीः, अत्रार्थेऽन्त्यमिति देहलीदीपन्यायेनान्वेति उपदेशे इति चानुवर्तते, तेन न काचिदनुपपत्तिः इति ।

यद्वा ''हलन्त्यम्'' इत्येकं सूत्रम् ''ल्'' इति चापरम् ।तत्र व्यञ्जनात्मकस्य द्वितीयसूत्रस्य लुप्तस्याप्यनुसंधानेन विषयीकृतस्यानुवृत्तेस्त्रिभिः पदैः सह योजने कृते प्रागुक्तवाक्यार्थधियः साम्राज्यम्, न हि श्रुतमेव वाक्यार्थबुद्धिमुत्पादयतीत्यास्ते नियमो भावनोपनीतादपि तस्माद् व्युत्पन्नानामर्थबुद्धेः सर्वसम्मतत्वा, अमुं चार्थम् ''अणुदित्'' सूत्रगतकौस्तुभखण्डनावसरे व्यक्तमुपपादयिष्यामः ।

यद्वा ''हल्'' इति सूत्रे लकारोऽनुनासिकः क्रियते, तस्यानुनासिकत्व–सामर्थ्यादनचोऽप्युपदेशेऽजनुनासिक इतीत्संज्ञा भविष्यति अस्मिन्नेव सूत्रे लकारपरतो लकारस्य संयोगान्तलोपाद्वा, यँल्लोकमित्यत्रोपदेशाभावाद–सिद्धत्वाभावाद्वा नेत्संज्ञा ।

अथात्र संयोगोन्तलोपो दुर्लभः संयोगान्तस्य पदस्याभावदिति चेन्न–'संयोगान्तस्य सतः पदान्तस्य लोप' इति पक्षस्यापि तत्र स्थितत्वात् ।अन्यथा समुदायस्य संयोगसंज्ञा नावयवानामिति मुख्यपक्षे संयोगेन पदस्य विशेषणान्तलाभेऽन्तग्रहणस्य वैयर्थ्यापत्तेः । .... एतेन लकारस्य संयोगान्तलोपो दुर्लभः इति मनोरमाऽसम्बद्धैव इत्यादिना.... ।[3]

पण्डितराजमतपर्यालोचनम् – अयमत्रत्यो ग्रन्थः खण्डनबुद्ध्या प्रवृत्त इति । अत्र पण्डितराजोऽन्योनाश्रयं परिहर्त्तुमारब्धं भाष्यस्थप्रथमसमाधानवार्त्तिकस्य

''सिद्धं तु लकारनिर्देशात्''[4] इत्यस्याशयं भाष्यकारहृदयमविज्ञायैव कैयटोक्तव्याख्यया विवृणोति। कैयटेन तत्र 'हल् च ल् चेति समाहारद्वन्द्वं कृत्वा संयोगान्तस्य लोप इति लकारो लुप्यत[5] इत्युक्तम्' । यणः प्रतिषेधारम्भेण झल्ग्रहणापकर्षेण च संयोगान्तलोपाप्राप्तेः कैयटोक्तं समाधानं न युज्यते । अपि च वक्तॄणां सह बोधासम्भवेन नाज्झलाविति सूत्रोक्तवाक्यापरिसमाप्तिन्यायेन भाविसंज्ञया पूर्वमाचार्याणांव्यवहारेण च सहविवक्षाभावाद् द्वन्द्वाप्राप्तेश्चेति ।अत एव तत्र भाष्यकारेण लकारनिर्देशः कर्तव्य इत्युक्तम्, न तु लुप्तनिर्दिष्ट इति । यतो निर्देशो नाम उच्चारणमिति । सपष्टमिदं ''हलन्त्यम्'' इति सूत्रभाष्यव्याख्यान उद्योते[6]। अनेन कैयटोक्तनिरासेन जगन्नाथोऽपि प्रत्युक्त एव । अत एव च भाष्यकारेण पूर्वोक्तसमाधानवार्तिकस्य सदोषत्वात् समाधान्तरं वक्तुं ''एकशेषनिर्देशाद्वा''[7] इति वार्तिकान्तरं परमसिद्धान्तत्वेन निर्दिष्टम्।

तस्माद्भट्टोजिमतं निराकर्तुं जगन्नाथोक्तकल्पत्रयमप्ययुक्तमेव परमतखण्डनायैव तस्य प्रयोजकत्वाच्च । तथा हि – प्रथमकल्पे ''हल्'' इत्येकं सूत्रम् ''अन्त्यम्'' इति चापरम् । मकारपरतः ल् इति व्यञ्जनं संयोगान्तलोपेन लुप्यत इत्येतसर्वमभ्युच्चयमात्रम् । संयोगान्तलोपे यणः प्रतिषेधस्य वार्तिककृताऽऽरम्भात् । तत्प्रत्याख्यानपक्षेऽपि ''झलो झलि'' इत्यतः झल्ग्रहणमपकृष्य संयोगान्तस्य झलो लोपविधानात् । लकारस्य च झल्त्वाभावादप्राप्तिरेव मकारपरतो लकारस्य । स्पष्टः समानाशयः प्रौढमनोरमायामपि 'हल् च ल् चेति' समाहारद्वन्द्ववाचिमतनिराकरणप्रसङ्गे।[8] उद्योतेन च पुष्टीकृतं मतमिदतीतः प्रागेवास्माभिरुपवर्णितम् ।

यदुक्तं द्वितीयकल्पे ''हलन्त्यम्' इत्येकं सूत्रम्, ''ल्'' इति चापरमिति, तदपि न । भाष्यकारेण तथाऽनुक्तत्वात्। अयञ्च द्वितीयः कल्पः जगन्नाथोक्तपूर्वकल्पस्यैव भङ्ग्यन्तरेण प्रस्तावः ''सिद्धं तु लकारनिर्देशात्'' इति वार्त्तिकस्य प्रकारान्तरेणापव्याख्यानं वा । यदपि – तत्र व्यञ्जनात्मकस्य द्वितीयसूत्रस्य लुप्तस्याप्यनुसंधानेन विषयीकृतस्यानुवृत्तेस्त्रिभिः पदैः सह योजने कृते प्रागुक्तवाक्यार्थधियः साम्राज्यमिति, तत्तु गौरवग्रस्तत्वान्न स्वीकार्यम्। गौरवञ्च लुप्तमभिसंधाय ''उपदेशे'' ''अन्त्यम्'' ''इत्'' इति त्रिभिः पदैः योजनं कृत्वा द्राविड़प्राणायाम इव दीर्घकल्पनारूपम्। वस्तुत इयं जगन्नाथोक्तिरपि भाष्ये 'लकारनिर्देश कर्तव्यः' इत्यनेनैव प्रत्युक्ता।

यच्चोक्तं तृतीयकल्पे – ''हल्'' इति सूत्रे लकारोऽनुनासिकः क्रियते, तस्यानुनासिकत्वसामर्थ्यादनचोऽप्युपदेशेऽजनुनासिक इतीत्संज्ञा भविष्यति

अस्मिन्नेव सूत्रो लकारपरतो लकारस्य संयोगान्तलोपाद्वा, यॅल्लोकमित्यत्रोपदेशाभावद– सिद्धत्वाभावाद्वा नेत्संज्ञा'' इत्याशयस्य भाष्य उपवर्णितत्वाद् ''हलन्त्यम्'' इति सूत्रावृत्तिरयुक्तैवेति तत् न । एतस्य भाष्यग्रन्थस्यैकदेश्युक्तित्वात् ।एकदेश्यक्तित्वं तु नागेश एवं विवृणोति उद्योतग्रन्थे – ''एतस्यैकदेश्युक्तित्वं तु लृकारस्येत्संज्ञाया अपि हल्पदार्थसिद्धेः प्रागलाभात् । 'लृदित' इति ज्ञापकेन या लकारस्य गुणभूतस्येत्संज्ञोक्ता, तत्र 'लृदित' इति ज्ञापकमपि शिथिलम्। सर्वेषामचामित्संज्ञाकाले तस्यापीत्त्वालाभात्। एवं णलो लित्वस्यापि ज्ञापकतोक्तिः, चादीनामित्संज्ञाप्रवृत्तिकाले णलो लस्यापि तत्प्रवृत्त्या ज्ञापकासंभवात् ।तस्मादेकशेषनिर्देशाद्वेत्येव समाधानम्''[9]।

एकशेषनिर्देशेन ''हल् च हल् च'' इत्यनेनायमर्थः सिद्ध्यति – कृतैकशेषेण हल्पदेन सम्बन्धसामान्यषष्ठ्याः समासः । अन्त्यशब्दस्य च द्वन्द्वान्ते श्रूयमाणस्येवोभयत्रान्वयः । एवञ्च हल्सूत्रान्त्यं हलूपान्त्यञ्चेति बोधः । अयमेवाशयो लघुशब्देन्दुशेखरेऽपि वर्णितः[10]। एतदेव भट्टोजिना सूत्रावृत्त्या साधितम्।आवृत्तौ गौरवमिति तु न।हलिति कृतैकशेषेण अन्त्यपदसमासे बोधसमये 'हल्सूत्रान्त्यं हलूपान्त्यञ्चेति' वाक्यद्वयेनैव बोधात् ।आवृत्त्याऽपि तथैवार्थलाभाच्च ।

अग्रे चोक्तं 'संयोगान्तस्य सतः पदान्तस्य लोप' इति पक्षस्यापि तत्र स्थितत्वात् इत्यादि इति चेद् एतादृशस्य पक्षस्यैव ''हलोऽनन्रासंयोगः'' (पा.सू. 1.1. 7) इति सूत्रे ''संयोगान्तस्य लोपः'' (पा.सू. 8–2–23) इति सूत्रे वाऽनुक्तत्वादियमप्युक्तिधिन्त्या। यदि चोच्येत ''सरूपाणाम्...'' (पा.सू. 1–2–64) इति सूत्रे भाष्ये ''पृथक्ससर्वेषामिति चेदेकशेषे पृथग्विभक्त्युपलब्धि–स्तदाश्रयत्वात्''।। इति दूषणवार्तिकस्य बाधकभाष्ये ''संयोगान्तलोपेन सिद्धम्''[12] इत्यत्र कैयटग्रन्थे वृक्षस्–स्–स् इति स्थिते संयोगान्तलोपो भविष्यति इति वर्तते । तेनायं पक्षः सिद्ध इति चेन्न । तत्रैवाग्रे कैयटे 'अत्र व्याचक्षते – संयोगस्य योन्तः सकारस्तस्य लोपः स च हल्ङ्याब्भ्य इत्यनेनेति'[13] उल्लेखात् जगन्नाथोक्तस्यासङ्गतत्वात् ।अपि च तत्रैव भाष्ये कैयटं व्याचक्षाणो नागेश उद्योते 'संयोगान्तस्य पदान्तस्येति व्याख्यानमसङ्गतमेव, घ्वसोरितिसूत्रे द्विशकारो निर्देश इति भाष्यविरोधात् । संयोगसंज्ञासूत्रेऽन्तपदसामर्थ्येन द्विवचनान्तेन समास इति ध्वनयता भाष्यकृता प्रयोजनान्तराभावस्य ध्वनितत्वेन तादृशेऽर्थे मानाभावाच्च'14 इति कथयन् जगन्नाथोक्तपक्षस्य स्पष्टतयाऽप्रामाण्यं सूचयति ।

अनया रीत्या कृतायां मनोरमाकुचमर्दिनीस्थविचारस्य पर्यालोचनायामेतेंऽशाः सिद्धाः । यदेकदेशिभाष्योक्तिं स्वीकृत्य भट्टोजिकृत–सूत्रावृत्तिरतितमामयुक्तैति पण्डितराजोक्तिः सिद्धान्तिभाष्यविरुद्धत्वात् केवलं परमतखण्डनाय प्रवृत्ता, न तु तत्र किञ्चिदस्ति प्रामाण्यम् । एवमेव स्वोक्तप्रमाणान्तराणामपि भाष्योद्योतादिग्रन्थ– विरुद्धत्वात् निर्मूलत्वाच्चा–प्रामाण्यमेव । दीक्षितोक्तं तु भाष्यसम्मतमित्यतः ''हलन्त्यम्'' इति सूत्रावृत्तिरन्योन्याश्रपरिहाराय युक्तैवेति दिक् ।

पादटिप्पण्यः

1. भट्टोजिदीक्षितविरचितवैयाकरणसिद्धान्तकौमुदी पृ.सं. 1
2. भट्टोजिदीक्षितविरचितप्रौढमनोरमा पृ.सं. 5—13
3. भट्टोजिदीक्षितविरचितप्रौढमनोरमाकुचमर्दिन्यां पृ.सं. 2—3
4. महाभाष्ये द्वितीयखण्डे ''हलन्त्यम्'' (1—3—3) सूत्रे पृ.सं. 130
5. महाभाष्ये द्वितीयखण्डे ''हलन्त्यम्'' (1—3—3) सूत्रे प्रदीपे पृ.सं. 130
6. महाभाष्ये द्वितीयखण्डे ''हलन्त्यम्'' (1—3—3) सूत्रे उद्योते पृ.सं. 130
7. महाभाष्ये द्वितीयखण्डे ''हलन्त्यम्'' (1—3—3) सूत्रे पृ.सं. 130
8. भट्टोजिदीक्षितविरचितप्रौढमनोरमा पृ.सं. 11
9. महाभाष्ये द्वितीयखण्डे ''हलन्त्यम्'' (1—3—3) सूत्रे उद्योते पृ.सं. 130
10. लघुशब्देन्दुशेखरे संज्ञाप्रकरणे पृ.सं. 14
11. महाभाष्ये द्वितीयखण्डे ''सरूपाणाम्'' (1—2—64) इतिसूत्रे पृ.सं. 75
12. तत्रैव
13. तत्रैव प्रदीपे
14. तत्रैव उद्योते

परिशीलिता ग्रन्थाः –

1. भट्टोजिदीक्षितविरचितप्रौढमनोरमा (लघुशब्दरत्न–ज्योत्सना–कुचमर्दिनी– टीकाभिः प्रभा–विभेति टिप्पणीद्वयोपेता), चौखम्बा–अमरभारती–प्रकाशनम्, वाराणसी, द्वितीयसंस्करणम्, 1983

2. भट्टोजिदीक्षितविरचितवैयाकरणसिद्धान्तकौमुदी (मूलम्), श्रीस्वामिनारायणाश्रितैः श्रीमत् 'श्रीकृष्णस्वरूपकाव्यतीर्थैः' संशोधिता, चौखम्बा–पब्लिशर्स, वाराणसी, 2004

3. नागेशभट्टप्रणीतलघुशब्देन्दुशेखरः (म.म.श्रीभैरवमिश्रविरचितया चन्द्रकलया टीकया समेतः), चौखम्बासंस्कृतसंस्थानम्, वाराणसी, तृतीयसंस्करणम्, 2001

4. श्रीमद्भगवत्पतञ्जलिमुनिविरचितव्याकरणमहाभाष्यम् (प्रदीपोद्योतच्छायासमन्वितम्) 1–2–6 खण्डाः, सम्पा.– श्रीभार्गवशास्त्री, चौखम्बा–संस्कृत–प्रतिष्ठानम्, देहली, पुनर्मुद्रितसंस्करणम् 2007.

■ ■ ■

महाराष्ट्रस्य वारकरीसम्प्रदायस्य स्वरूपं भक्तिसङ्कल्पना च

डॉ. रसाळ दिनेश पांडुरंग

वैष्णवसम्प्रदायेषु वारकरीसम्प्रदायः अन्यतमः। वारकरीसम्प्रदायसुगन्धं वपुष्याधाय सन्धाय चेतो ब्रह्मणि महानन्देन जीवतां सत्पुरुषाणां अयं सम्प्रदायः । तस्मादेव महाराष्ट्रभूमिः वारकरीसम्प्रदायस्य सत्पुरुषाणां भूमिः इत्याख्यायते । भक्तपुण्डलिकमारभ्य संतज्ञानेश्वरः, तुकारामः, नामदेवः, एकनाथः, प्रज्ञाचक्षुः गुलाबराव महाराज इति नैके सत्पुरुषाः अस्यां भूमौ प्रादुरर्भवन् । एतेषां समेषामपि प्रादुर्भावस्य कारणं सकलजीवकल्याणमेव ।

संसारेऽस्मिन् संसरतां समेषामपि प्राणिनां सुखप्राप्तिः दुखनिवृत्तिश्च अभिलाषविषयः। इयमेव सुखप्राप्तिः दुखनिवृत्तिश्च मोक्षपदवाच्या भवति । एवञ्च परमसुखावाप्तिपूर्वकात्यन्तिकदुःखनिवृत्तिस्वरूपोऽयं मोक्षः कथमुपलब्धुं शक्यः, कथं वा सम्पादनीयः किञ्च तत्र साधनीयमित्येवास्त्यत्र महान् संशयः। मोक्षस्य प्रकृष्टमुपायमजानन्तो जनाः यस्मिन् कस्मिन्नपि बन्धसाधने एवाऽपातरमणीयतां पश्यन्तः मोक्षसाधनत्वभ्रान्त्या प्रवर्तमानाः संसारमहोदधौ निपतन्ति। निपतितानेतान् भ्राम्यतो जनान् विलोक्य मातापितृसहस्त्रेभ्योऽपि अधिकतरवात्सल्यशालिनः इमे सत्पुरषाः **बुडते हे जन न देखवे डोळो येतो कळवळा म्हणोनिया।**[1] इति अभंगोक्तरीत्या वात्सल्यातिशयात् निमज्जितान् जनान् दृष्ट्वा अत्यन्तं दुःखिता एते सत्पुरुषाः स्वानुभवसिद्धं संसारतरणोपायं मुक्तहस्तैः जनेषु प्रासारयन् । सकलजीवकल्याणस्वरूपः संसारतरणोपायः वस्तुतः दुर्ग पथः सामान्यानामिति कविभिः उक्तत्वात् तस्यैव कठिनतमस्य मार्गस्य सरलीकरणार्थं सत्पुरुषाणां भुवि जन्य जायते। सत्पुरुषाणां जीवनस्य तात्पर्यमेवेदम् । संत तुकारामवर्याः तत्तात्पर्यम् अभंगेषु प्रत्यपादयन् –

आम्ही वैकुण्ठवासी ।आलो याच कारणासी ।
बोलिले जे ऋषी ।साचभावे वर्ताया ।।
झाडू संताचे मारग ।आडराने भरले जग ।
उच्छिष्टाचा भाग ।शेष उरला तो सेवू ।।

अर्थे लोपली पुराणे । नाश केला शब्दज्ञाने ।
विषयलोभी मने । साधन हे बिडविले ।।
पिटु भक्तिचा डांगोरा । कळिकाळासी दरारा ।
तुका म्हणजे करा । जयजयकार आनंदे ।।[2]

अस्मिन् अभंगे तुकारामवर्याः स्वावतारप्रयोजनं कथयन्ति। वस्तुतः वयं वैकुण्ठवासिनः तथापि संकल्पपूर्त्यर्थं कार्यमेकं मनसि निधाय भूलोकमागताः ।अत्र तुकारामः स्वात्मानं वैकुण्ठवासी इति कथयति तेन च न तेषां अस्मदादिवत् जन्ममरणरूपः संसारबन्धः अस्ति इति स्फुटम् । तथैव यथा अस्माकं शरीरधारणं कर्मकृतं वर्तते तद्वत् एतेषां न कर्मणा शरीरोत्पत्तिः, अपि तु जगदुद्धारार्थमेव शरीरधारणम् इति। एवं वैकुण्ठवासिनः वयं मोक्षमार्गस्य पुनरुज्जीवनाय तथा सकललोककल्याणार्थमेव समागताः ।अत्र सकललोककल्याणस्य मोक्षस्य स्वरूपं तु वेदशास्त्रेतिहासादिषु सम्यक् प्रतिपादितमेवास्ति किन्तु तस्य दुर्गमत्वात् तदेव परं तत्त्वं भक्तिमार्गमाध्यमेन बोधयितुं वयं भूलोकमगच्छाम अतः अन्तिमपङ्क्तौ वदन्ति – पिटू भक्तिचा डांगोरा ।भक्तेः उच्चैः आघोषं कुर्मः येन भक्तिः सर्वत्र प्रसृता स्यादिति । इत्येवं चिन्तयामश्चेत् अवगम्यते यत् महाराष्ट्रस्थितस्य वारकरीसम्प्रदायस्य सर्वेषामेव सत्पुरुषाणां भक्तेः प्रसारः तन्माध्यमेन जगदुद्धार इत्यस्ति सत्यसङ्कल्पः ।वदन्ति च –

सोपे वर्म आम्हां सांगितले संती टाळ दिंडी हाती घेऊनि नाचा ।
समाधीचे सुख सांडा ओवाळूनी ऐसा या कीर्तनी ब्रह्मरसः ।।
पुढती घडे चढते सेवन आगळे भक्तिभाग्य बले निर्भरता ।
उपजोंचि नये सन्देह चित्तासी मक्ति चारी दासी हरिदासांच्या ।
तुका म्हणे मन पावोनि विश्रांती त्रिविध नासती ताप क्षणे ।।[3]

वारकरी सम्प्रदायः

भारते विद्यमानेषु भक्तिसम्प्रदायेषु वारकरी सम्प्रदायः अन्यतमः । वारी करोति इति वारकरी कथ्यते ।महाराष्ट्रे वारी नाम यात्रा ।नियमेन तीर्थक्षेत्रगमनमेव वारीपदेन संसूच्यते ।वस्तुतः वारी इत्यस्य पदस्य नैकाः व्युत्पत्तयः भवन्ति ।केचन भगवन्नामसङ्कीर्तने समुत्पन्नस्य विघ्नस्य वारणं निवारणं करोति सः वारकरी इति कथयन्ति । सम्प्रदायेऽस्मिन् वारी इत्ययं शब्दः गमनागमनमथवा यात्रा इत्यस्मिन्नर्थे स्वीक्रियते ।प्रतिवर्षं प्रतिमासं वा नियमेन निर्विघ्नतया यः पंढरपूरं गच्छति सः मनुष्यः वारकरीपदवाच्यः भवति ।तेषां उपासनापन्था एव वारकरी

सम्प्रदायः । सम्प्रदायेऽस्मिन् पंढरपूरस्य वारी अत्यन्तं महत्वपूर्णा वर्तते । वारी इत्युक्ते भक्तेः पराकाष्ठा एव। तां पराकाष्ठां यः अनुभवति सः आजीवनं वारीव्रतमेव करोति । साक्षात् जगद्गुरवः संतः तुकारामवर्याः पंढरपूरयात्रायाः श्रेष्ठत्वं महत्वञ्च प्रतिपादयन्तः मोक्षमपि तिरस्कुर्वन्ति–

हीच व्हावी माझी आस जन्मोजन्मी तुझा दास ।
पंढरीचा वारकरी वारी चुको न दे हरी ।।[4]

हे भगवन्, इयमेव मे मनोकामना ''अहं प्रत्येकस्मिन् जन्मनि तव भक्तः भवामि।'' अत्र वारं वारं जन्मग्रहणं वाञ्छन्ति तदर्थञ्च मोक्षमपि तिरस्कुर्वन्ति । तत्र पुनः किमर्थं वारं वारं जन्मदुःखानुभवः इति पृच्छायामुच्यते – पंढरीचा वारकरी जन्म प्राप्त तव दासो भूत्वा अहं नियमेन सर्वदा पंढरपूरस्य वारी कर्तुमिच्छामि इति ।

संत नामदेववर्योऽपि –

पंढरीचा वास चन्द्रभागे स्नान । आणिक दर्शन विठोबाचे ।
हेचि घडो मज जन्मजन्मान्तरी । मागणे श्रीहरी नाही दुजे ।।[5]

इत्यस्मिन् अभंगे पंढरपूरवासः, चंद्रभागास्नानं तथा श्रीविठ्ठलस्य दर्शनं, नामसंकीर्तनं प्रतिजन्मनि मम भवतु इति सम्प्रार्थ्य मोक्षमेव तिरस्करोति ।

एवं रीत्या पंढरपुरस्य वारी (यात्रा) सम्प्रदायेऽस्मिन् विशिष्टं स्थानमावहति । वारकरीसम्प्रदाये अनुयायिनां वारी अपेक्षया अन्यत् किमपि प्रियं नास्ति । पंढरपूरगमनेन नवविधभक्तिः सिध्यति इत्यस्ति समेषां निश्चयः अतः भक्तिसुखमतिरिच्य अन्येषु भौतिकविषयेषु तेषां मनः न लगति । उच्यते –

संपदा सोहळा नावडे मनाला लागला टकळा पंढरीचा ।।
जावे पंढरीसी आवडे मनासी कई एकादशी आषाढीये ।।[6] **इति**

एवं भक्तिपरिपूर्णा वारीपरम्परा वारकरी सम्प्रदाये वर्तते । वस्तुतः अस्य वैष्णवसम्प्रदायस्य नाम वारीमाध्यमेनैव प्रसिद्धमभवत् ।

उपास्यं दैवतम्

महायोगपीठे तटे भीमरथ्यां वरं पुण्डलिकाय दातुं मुनीन्द्रैः।
समागत्य तिष्ठतमानन्दकन्दं परब्रह्मलिङ्गं भजे पाण्डुरङ्गम्।।[7]

श्रीविष्णोः अवतारः परब्रह्मलिङ्गस्वरूपः पाण्डुरङ्गः वारकरी सम्प्रदायस्य उपास्यं दैवतम् अस्ति । भक्तपुण्डलिकस्य भक्त्या नितरां सन्तुष्टः परमात्मा पुण्डलिकमुद्धर्तुं पंढरपूरमागत्य स्थितः। पुण्डलिकस्तु जगदुद्धारं मनसि निधाय आगतं परमात्मानं तत्रैव पंढरपुरे प्रतिष्ठापयामास । **भक्ति देखोनि लाचावला । जाउ नेदी उभा केला।।**[8] इत्यभंगोक्तिः अमुं सन्दर्भं प्रमाणयति । एवं भक्तिसामर्थ्यवशात् परब्रह्मलिङ्गं निर्गुणं निराकारमद्वयं च तत्त्वं सगुणं साकारं च भूत्वा लोकोद्धारार्थं अष्टाविंशतियुगेभ्यः भगवद्भक्तानां भक्तिं सेवते । उच्यते च – **आनन्द अद्वय नित्य निरामय । ते हे समचरण साजिरे विटेवर।।**[9] पंढरपूरे भगवतः प्रतिष्ठापनानन्तरं नगरमिदं साम्प्रदायिकानां कृते मातृगृहमेव जातम्। पूर्वाचार्याः पाण्डुरङ्गं मातरमिव पश्यन्ति । तद्ग्रामः मातृगृहमिव भावयन्ति। अतः अभंगेषु लिख्यते –

माझे माहेर पंढरी आहे भिवरेच्या तीरी।[10] इति।

मातृस्वरूपः विठ्ठलः भक्तवत्सलः वर्तते । सामान्यानामपि मोक्षप्राप्तिः स्यादिति हेतोः संसारसागरं तर्तुं तेषामपि शक्तिः विश्वासश्च स्यादिति विचिन्त्य एव भगवान् पंढरपूरम् आगतः। यस्मिन् संसारसागरे महान्तोऽपि तपस्विनः, ज्ञानिनः, विद्वांसः कदाचित् निमज्जिताः भवन्ति सोऽयं संसारसागरः मद्भक्ताः लीलया तरन्ति इति भगवान् स्वविग्रहद्वारा प्रतिपादयत्। भगवद्विग्रहे तस्य हस्तौ नितम्बोपरि स्त तत् किमर्थमिति भगत्पादाः वर्णयन्ति –

प्रमाणं भवाब्धेरिदं मामकानां नितम्बः कराभ्यां धृते येन तस्मात् ।
विधातुर्वसत्यै धृतो नाभिकोशः परब्रह्मलिङ्गं भजे
पाण्डुरङ्गम्।।[11]

वैकुण्ठप्राप्तौ विद्यमानं काठिन्यं विज्ञाय सर्वथा अगम्यमिदं सामान्यनामिति मत्वा सकललोकस्य वैकुण्ठवाससुखं भवतु इति विचार्य वैकुण्ठमेव भूमौ आनयत् । तदुच्यते –

वेकुण्ठ जावया तपाचे सायास । लागे जीवा नाश करणे बहु।।
तया पुण्डलिके केला उपकार । फेडावया भार पृथवीचा ।।
तुका म्हणे केली सोपी पायवाट । पंढरी वैकुण्ठ भूमीवरी ।।12

एवं सकललोकानन्दप्रदायकः वैकुण्ठाधिपतिः पाण्डुरङ्गपरमात्मा सम्प्रदायस्य उपास्यं दैवतमस्ति । अस्य दर्शनमात्रेणैव जना विच्छिन्नसकलसंसारबन्धाः जायन्ते।

सम्प्रदाये भक्तिसङ्कल्पना

भज् सेवायाम् इत्यस्मात् धातोः निष्पन्नोऽयं भक्तिशब्दः । अस्यार्थः सेवा। भगवतः सेवा एव भक्तिः । सन्तज्ञानेश्वरः भक्तिस्वरूपं प्रतिपादयन् वर्णयति – **तनु मनु जीवे चरणाशी लागावे। आणि अगर्वता करावे दास्य सकळ।**[13] इति । नाम कायेन, मनसा, वचसा, आत्मना च अहंभावरहितं भगवच्चरणारविन्ददास्यत्वमेव भक्तिः भवति ।

विष्णुसहस्त्रनामस्तोत्रे आदावेव विश्वं विष्णुः इत्युच्यते । अस्यार्थः दृश्यमानमिदं चराचरात्मकं जगत् विष्णुरेव। व्यापकत्वात् विष्णुः इति शब्दार्थोऽपि तमेवार्थ द्योतयति । सर्वव्यापकस्य परब्रह्मणः विष्णोः अस्मिन् प्रपञ्चे सर्वेषां पदार्थानाम् अन्तर्यामित्वेन ज्ञानं तथा सर्वत्र सर्वेषु विष्णुतत्त्वस्य अनूभूतिरेव भक्तिः भवति ।भगवद्भक्तस्य भक्तिमवलम्ब्य अयमेव भावः अभंगेषु वर्णितः –

विष्णुमय जग वैष्णवांचा धर्म ।भेदाभेद भ्रम अमंगळ ।।
आईका जी तुम्ही भक्त भागवत ।कराल ते हित सत्य करा ।।
न करावा द्वेष भूतांचा मत्सर ।वर्म सर्वेश्वर पूजनाचे ।।
तुका म्हणे एका देहाचे अवयव ।सुख दुःख जीव भोग पावे ।।14

अयं सर्वोऽपि प्रपञ्चः तेन विष्णुना व्याप्तः वर्तते इति चिन्तनमेव वैष्णवानां भक्तानां धर्मः। अत्र न भेदादिकं चिन्तनीयम् । अयि भागवताः, भक्ताः आत्महितमिच्छन्ति चेत् भगवद्भक्तिं कुर्वन्तु । कथं वा भगवद्भक्तिः कर्तव्या इति पृच्छायामुच्यते – **न करावा द्वेष भूतांचा मत्सर ।**

स्वभिन्नेषु चराचरपदार्थेषु द्वेषभावना, मात्सर्यभावना च न स्यात् । नाम सर्वेषु प्रेमभावना स्याद् । विष्णुरेव जगदात्मना सर्वत्र प्रसृतः अतः जगदात्मना सैव विष्णुः सेव्य । एवं सर्वप्रपञ्चविषयिणी भगवद्भक्तिः समुत्पद्यते चेत् सर्वत्र विष्णोः दर्शनं भवति। तेन च द्वितीयस्य विषये विद्यमानं द्वेषादिकं नश्यति । परमप्रेमरूपा भक्तिः उदेति।भगवद्भक्तेः इदमेव स्वरूपं वर्तते ।प्रपञ्चे सर्वेष्वपि पदार्थेषु विष्णोः अनुभूतिः भक्तिरेव।भगवत्साक्षात्कारस्य प्रथमं श्रेष्ठतमं साधनमपि इदमेवोच्यते –

भूतदया ठेवा मग काय उणे ।प्रथम साधन हेचि असे ।।[15]

इति अभंगोक्तरीत्या भूतानां परस्परप्रेमभावेनैव भगवत्साक्षात्कारस्य प्रथमं साधनम् । एकनाथोऽपि वर्णयति –

मद्भावो जोडलया सर्वा भूती ।तेणे प्रकारे माझी चौथी भक्ती ।।

तिच्या पायी चारी मुक्ती ।सदा लागती ...... ।।[16]

जगति भगवद्भावना द्वेषभावनायाः उपशमनानन्तरमेव जायते । स च उपशमः विश्वं विष्णुः अथवा विष्णुमय जग इति विचारे सत्येव भवति ।अतः भक्तिः नाम सर्वेषु भगवद्दर्शनानुभूतिरेव ।संतजनाबाई स्वानुभवं प्रकटयति –

वामसवे दोहिकडे दिसे देवाचे रूपडे ।।
खाली पाही अथवा वरी जिकडे पाहावे तिकडे हरी ।।
डोळे झाकूनिया पाहे पुढे गोपाळ उभा आहे ।।
अणुरेरणु चक्रपाणी खूण झाली दासी जनी।।[17]

प्रपञ्चे सर्वत्र सर्वेषु कार्येषु पदार्थेषु अहं भगवन्तं पश्यामि, सूक्ष्मातिसूक्ष्मे अणावपि भगवद्रूपमेव दृश्यते ।इति भगवद्भक्तेः पराकाष्ठां सूचयति संतजनाबाई ।

सकलभूतेषु भगवदनुभव एव भक्तियोगः इति सन्तज्ञानेश्वरस्य वचनमपि तत्र प्रमाणम् –

जे जे भेटे भूत ते ते मानिजे भगवन्त ।।
हा भक्तियोगु निश्चित जाण माझा ।।[18]

साक्षात् भगवान् स्वभक्तियोगं वर्णयति अत्र यत् यत् भूतं भौतिकञ्च वर्तते तत् सर्वं भगवद्रूपेणैव ग्राह्यम् अयमेव मे भक्तियोगः।

भक्तेः परमपुरुषार्थत्वम्

वारकरीसम्प्रदाये भक्तिः मोक्षस्य तथा आत्मसुखस्य श्रेष्ठतमं साधनमिति जेगीयते । धर्मार्थकाममोक्षाख्याः चत्वारो पुरुषार्थाः अङ्गीकृताः । पुरुषैः अर्थ्यते, प्रार्थ्यते, साक्षात् इच्छाविषयीक्रियते सः पुरुषार्थः ।पुरुषैः साक्षादिच्छाविषयीक्रियते सुखमेव नान्यत् किमपि तस्मात् सुखमेव पुरुषार्थः। एतेषु चतुर्षु पुरुषार्थेषु मोक्ष एव परमपुरुषार्थः। धर्मार्थकामानां साक्षात् सुखस्वरूपत्वं नास्ति अतः त्रयाणामेतेषां सुखसाधनत्वेनैव स्वीकारः क्रियते। तुरीयस्य मोक्षस्य तु साक्षात् सुखस्वरूपत्वात् साध्यत्वमेवाङ्गीक्रियते। तस्मात् इतरत्रयाणामपेक्षया मोक्षस्य परमपुरुषार्थत्वमपि प्रतिपाद्यते । सन्तज्ञानेश्वराचार्यैः परम्परया अङ्गीकृतानां चतुर्विधपुरुषार्थानां विस्तारः कृतः। सन्तज्ञानेश्वरः योगी, जीवन्मुक्तः ब्रह्मज्ञानी, भगवद्भक्तश्च आसीत् । अतः योगिनः समाधिसुखं, जीवन्मुक्तस्य ब्रह्मज्ञानिनः मुक्तिसुखं तथा भगवतः

भक्तिसुखमिति सर्वमपि सन्तज्ञानेश्वरस्य अनुभवसिद्धमासीत् । भिन्नभिन्नावस्थासु विद्यमानेन सुखानुभवेन युक्तैः ज्ञानेश्वराचार्यैः भक्तेः साक्षात् परमसुखत्वमनुभूय भक्तिरपि पुरुषार्थ इति उद्घोषितम् । एवञ्च पञ्चमपुरुषार्थत्वेन भगवद्भक्तिः सम्प्रदाये अङ्गीकृता । वारकरी सम्प्रदायानुसारं भक्तिः मोक्षापेक्षया श्रेष्ठस्वरूपा भवति । वस्तुतः भक्तिः केवलं साधनं न अपि तु साध्यमपि भवति । सम्प्रदायेऽस्मिन् जीवनस्य अन्तिमं लक्ष्यं भक्तिरेव न तु मोक्षः । अतः अनुयायिनः मोक्षापेक्षया भवगद्भक्तिमेव इच्छन्ति । सन्त एकनाथवर्यः लिखति –

भावे करिता भगवद्भक्तिः । भक्त मुक्तिही न वाञ्छति ।।
तरी त्यांपासी चारी मुक्ती । दास्य करिती सर्वदा ।।[19]

भगवद्भक्ताः भक्तौ अत्यन्तमासक्ताः भवन्ति । भक्तिसुखमेव काङ्क्षमाणाः भक्ताः मुक्तिमपि तिरस्कुर्वन्ति । तथापि इयं मुक्तिः स्वयमेव दासीरूपेण भक्तानां पुरतः तिष्ठति इति एकनाथोक्तिः ।

भगवद्भक्तौ विद्यमानं प्रेमसुखमास्वाद्य तत्सुखमेव निरन्तरं भवतु इति सर्वेषामेव प्रार्थना वर्तते । भक्तिरससेवनार्थं संसारदुःखमपि अनुभवितुमानन्देन अङ्गीकुर्वन्ति । आत्मसाक्षात्कारानन्तरं जायमानं देवभक्तयोः अद्वैतमपि वस्तुतः पूर्वाचार्यैः तिरस्क्रियते । सन्ततुकारामवर्याः भगवन्तमुद्दिश्य वदन्ति –

नको ब्रह्मज्ञान आत्मस्थितिभाव मी भक्त तु देव ऐवे करी ।[20]

हे भगवन् ! जीवब्रह्मैक्यज्ञानम्, अद्वैतानुभवतो वा मह्यम् अनपेक्षितम् इदमुक्त्वा वस्तुतः मोक्षस्यैव तिरस्कारः कृतः । तर्हि किम् अपेक्षते इति चेत् – **मी भक्त तु देव ऐसे करी ।** अहं भक्त एव भवितुमिच्छामि भगवन् भवान् मम देव एव भवतु आवयोः देवभक्तसम्बन्धः सर्वदा अबाधितः स्याद् । देवभक्तसम्बन्धस्थापनार्थं मोक्षस्य तिरस्कारः क्रियते चेत् जन्ममरणरूपः संसारबन्धः भवति खलु । तत्रोच्यते –

मोक्षपद तुच्छ केले या करणे आम्हां जन्म घेणे युगायुगे ।
विटे ऐसे सुख नोहे भक्तिरस पुढता पुढती आस सेवावी हे ।।[21]

वयं प्रतियुगं युगे युगे जन्म प्राप्तुमिच्छामः अतः एव जन्मनः प्रतिबन्धकं मोक्षं तिरस्कुर्मः । तत् किमर्थं युगे युगे जन्मग्रहणमिति चेत् – **विटे ऐसे सुख नोहे भक्तिरस ।** भक्तिरसेवनार्थमेव मोक्षं तिरस्कृत्य युगे युगे जन्मग्रहणमिष्यते ।

एवं सम्प्रदायेऽस्मिन् मोक्षस्यापेक्षया भक्तेः माहात्म्यं वर्तते, अतः चतुर्णामपि पुरुषार्थाणाम् अपेक्षया परमपुरुषार्थरूपिणी भक्तिः अग्रगण्या वर्तते ।

सम्प्रदाये भक्तेः अनन्यत्वम् –

भक्तौ अनन्यभक्तिः इति कश्चन विशेषः । वस्तुतः भक्तिः अनन्यरूपैव भवति तथापि विशेषतः अव्याभिचारभावं प्रकटयितुमेव अनन्यभक्तिः इत्यच्यते । साध्वी स्त्री यथा स्वभर्तारं विहाय नान्यं कामयते तद्वदेव भगवन्तं विहाय भक्तोऽपि नान्यत् काङ्क्षते अयमेव भावः अनन्यभक्तिः। **पतिव्रते जैसा भ्रतार प्रमाण। आम्हां नारायण तैशापरी।।**[22] अनन्यभक्तौ सर्वात्मना सर्वाङ्गैः भगवद्समर्पणं भवति । **मने सहित वाचा काया। अवघे दिले पण्ढरीराया।।**[23] इत्युक्तरीत्या भक्तः भगवन्तं सर्वमपि समर्पयेत् । अनन्यभक्तौ भक्तस्य सकलेन्द्रियाणां विषयः भगवान् एव भवति । **बोलावा विठ्ठल पहावा विठ्ठल करावा विठ्ठल जीवभावे।।**[24] इति।

अनन्यभक्तः कथं भवति इत्यत्र सन्ततुकारामवर्यः लिखति –

भक्त ऐसे जाणा जे देही उदास । गेले आशापाश निवारोनि ।।
विषय तो त्यांचा झाला नारायण। नावडे जन धन माता पिता।।[25]

अनन्यभक्त्या युक्तस्य भक्तस्य देहेन्द्रियादिषु औदासीन्यं भवति । आशापाशोऽपि नष्टः भवति । तथा तस्य विषयः केवलं नारायणैव भवति । तं विहाय जनाः, धनं, पितरौ इत्यादयोऽपि न रोचन्ते । इयमेव अनन्यभक्तिः शरणागते मूलं भवति। तत्र अनन्यभक्त्या एव शरणागति सिद्ध्यति । तत्र शरणागतेरपि द्वैविध्यं स्वीक्रियते कतृतन्त्रशरणागतिः वस्तुतन्त्रशरणागतिश्च । कर्तृतन्त्रशरणागतौ भक्तेः अनन्यत्वं न भवति । सा तु सकामभक्तियुक्ता शरणागतिः भवति । किमपि प्रयोजनमुद्दिश्य भगवदाराधनं शरणागतिर्वा भवति चेत् कर्तृतन्त्रशरणागतिः उच्यते । इयं साधनरूपा शरणागतिः भवति । अपरा च अनन्यभक्तेः परिपक्वावस्था नाम वस्तुतन्त्रशरणागतिः । एतादृशीं भगवच्छरणागति यः स्वीकरोति सैव भगवत्प्रियः शरणागतः भवति । भगवान् तमेव शरणागतं स्वीकरोति । **पै आपुलेनि भेदेविण माझो जाणिजे जे एकपण तयापि नाव शरण मज येणे गा ।।**[26]

इयं शरणागतिः साध्यरूपा उच्यते। आत्मसाक्षात्कारानन्तरं जीवस्य ब्रह्मभावाप्तिः जायते तेन च अद्वैतमेव प्रस्थापितं भवति । तत्र या आत्मानुभूतिः जायते सैव साध्यरूपा शरणागतिः ।अस्याः स्तवनं स्वयं भगवान् करोति –

जो मज होय अनन्यशरण । त्याचे निवारी मी जन्ममरण ।
यालागी शरणागता शरण्य । मीचि एकु ।[27]

अनन्यभक्त्या शरणागतं मद्भक्तं सकलदुःखेभ्यः अहमेव रक्षामि। तस्य च अहमेव शरण्यः अस्मि।

ज्ञानोत्तरभक्तिः।

भगवतः साक्षात्कारार्थं भक्तिमार्गः सर्वजनसुलभः इत्यस्मात् हेतोः सम्प्रदायाचार्यैः भक्तिमार्गस्यैव उपदेशः कृतः। अनित्येऽस्मिन् दुःखसमन्विते प्रपञ्चे यदि जन्म जायेत तर्हि –

झडझडौनि वहिला निग । इये भक्तिचिया वाटे लाग।
जिया पावसी अव्यंग । निजधाम माझे ।।[28]

उत्तिष्ठन्तु, जागृताः सन्तः येन भगवल्लोकप्राप्तिः वर्तते तं भक्तिमार्गमनुसरन्तु इति साक्षात् भगवदुक्तिः । योगिनामपि दुर्लभा भगवल्लोकप्राप्तिः मद्भक्ताः तत्सेवया सहजं प्राप्नुवन्ति । अत्र भगवद्भक्तानामेव बलीयस्त्वं वर्तते ।

एथ एकचि लीला तरले जिही भजौनि माते वरिले।[29] इति। इतरमार्गाणामपेक्षया भक्तिरेव गरीयसी इति भगवदुक्तिरेवात्र प्रमाणम् ।

भक्तिः नाम सेवा । सेयं भक्तिः परापरभेदेन द्विधा विभज्यते । तत्र अपरा भक्तिः साधनरूपा भवति । अस्याः बहिरङ्गत्वमेव वस्तुतः स्वीक्रियते । पराभक्तिः साध्यरूपा भवति । इयमेव पराभक्तिः सम्प्रदाये अद्वैतभक्तिः अथवा ज्ञानोत्तरभक्तिः इति नाम्ना प्रसिद्धा । भक्तेः पराकाष्ठा नाम ज्ञानोत्तरभक्तिरेव इति वारकरीसम्प्रदायसिद्धान्तः।

वारकरीसम्प्रदायस्य आद्यपुरुषः श्रीपुण्डलिकः वर्तते । तदारभ्य एव अयं वारकरीसम्प्रदायः वर्तते । श्रीपाण्डुरङ्गस्य भक्तिपरम्परा तदारभ्य एव । एवं यद्यपि सम्प्रदायस्य आद्यपुरुषः भक्तपुण्डलिकः वर्तते तथापि सम्प्रदायस्य प्रवर्तकाचार्यस्तु सन्तज्ञानेश्वरमहाराज एव । सन्तज्ञानेश्वरः अस्य सम्प्रदायस्य तात्त्विकमधिष्ठानं रचितवान्।

वारकरीसम्प्रदायस्य स्वसिद्धान्तमण्डनं सन्तज्ञानेश्वरवर्यः अकरोत् । **आचार्यासी पुसोनि वाट**[30] इति उक्त्वा सिद्धान्तस्थापनवेलायां ज्ञानेश्वरः भगवत्पादाचार्यं स्मरति । एवञ्च भक्तिसम्प्रदायस्य अस्य सिद्धान्तस्थापनं कर्तुं प्रवृत्तः सन्तज्ञानेश्वरः भगवत्पादशङ्कराचार्यस्य सिद्धान्तमेवानुसरति । सामान्यतः

भक्तिसम्प्रदायः द्वैतमतमवलम्ब्यैव स्वसिद्धान्तं पुरस्करोति । यतोहि भक्तिश्चेत् देवभक्तयोः द्वैतभावः, सेव्यसेवकभावश्च अपेक्षते । अद्वैतभावनायां भेदाभावात् भक्तिः न शक्यते । किन्तु सन्तज्ञानेश्वर अद्वैततत्त्वानुसन्धानेन भक्तिमेव पुरस्करोति । एव वैष्णवसम्प्रदायेषु केवलाद्वैतमतस्य पुरस्कर्ता अयमेकैव वारकरी सम्प्रदायः अस्ति ।

भक्तिसङ्कल्पना द्वैतमवलम्ब्यैव भवति । देवभक्तयोः भेदज्ञानेन विना भक्तिः न सम्भवति इति सामान्यतः मतप्रवाहः वर्तते । अतः अभेदज्ञाने सत्यपि अद्वैतावस्थायां भक्तिः सम्भवति इति सन्तज्ञानेश्वरः प्रमाणपुरस्सरं प्रतिपादयति । भावार्थदीपिकायां द्वादशाध्याये ज्ञानीभक्तस्य वर्णनं एवं कथ्यते –

अर्जुना हा ठावो वेर्ही । सोहं भाव सरोवरी ।
द्वैताचा पैल तीरी । उतरो सरला ।।[31]

यः पुरुषः आत्मनः यथार्थज्ञानम्, अद्वैतज्ञानं प्राप्नोति सः आत्मवेत्ता द्वैतभावं तरति । अस्यार्थः भक्तः परमात्मना सह ऐक्यभावं प्राप्नोति । एवं जीवपरमात्मनोः ऐक्यभावापत्तिः चेत् कथं पुनः तत्र भक्तिः स्यादिति । उच्यते –

कि भक्तिसुखालागी । आपणाचि जाला दो भागी ।
वाटूनिया आंगी । सेवकै वाणी ।।
येरा नाव मी ठेवी । मज भजतेया वोज वरवी ।
न भजतया दावी । योगिया जो ।।[32]

ऐक्यं सम्पाद्यापि भक्तिसुखानुभूत्यर्थं भक्तिसुखोपभोगार्थं सः स्वयमेव एकात्मतां प्राप्यापि स्वात्मानं सेवकत्वेन तथा भगवद्रूपेण विचिन्त्य भक्तिं करोति । सन्तएकनाथवर्योऽपि भागवते अद्वैतभक्तेः अनुसरणं करोति ।

जेथे देव भक्त एक होती । एकपणे भजनस्थिती ।।
ऐसी साधकांसी प्राप्ती । ते परमभक्ती उद्धवा ।।[33]

यत्र देवभक्तयोः ऐक्यं भवति तथा ऐक्यावस्थायाम् भक्तिरपि भवति। साधकस्य इयमेव स्थितिः परमभक्तिः उच्यते । भक्तौ साधकस्य भगवति ममत्वभावना भवति। स भगवान मम, अहं च तस्य इति सेव्यसेवकभावः भवति। अपराभक्तौ एवं सेव्यसवेकभावः देवभक्तयोः द्वैतञ्च भवति । **देव माझा मी देवाचा हिच माजी सत्य वाचा ।**[34] किन्तु परभक्तेः उदयानन्तरम् अद्वैतभावं प्राप्य भक्तः किंस्वरूपो भवति इत्यत्र नामदेववर्यः वदति –

मीच माझा देव मीचा माझा भक्त । माझा मी कृतार्थ सहज असे ।।
बंध आणि मोक्ष मायेची कल्पना । पडिली होती मना भ्रान्ती कैसी ।।[35]

भक्तः स्वात्मानमेव देवत्वेन, भक्तत्वेन च पश्यति । एवम् अद्वैतभावं प्राप्त परिपूर्णं देवभक्तयोः ऐक्यं संसाध्यं कृतकृत्यं च भवति । वस्तुतः देवभक्तयोः अद्वैतं ज्ञायते तत्र ऐक्यं भवति चेत् कथं द्वैतमूलकः भक्तिव्यवहारः कर्तुं शक्यः इति कदाचित् शङ्का जायेत । तत्र सन्तज्ञानेश्वरः अद्वैतावस्थायां कथं न भक्तिः स्यात् इति प्रतिप्रश्नमेव पृच्छति –

देव देउळ परिवारु । कीजे कोरुनि डोंगरु ।।
तैसा भक्तिचा व्यवहार । का न व्हावा ।।[36]

यथा एकस्यैव पर्वतस्य खननं विधाय शिल्पकलया तत एव एकस्य पाषाणयुक्तस्य पर्वतस्य मन्दिरं, मण्टपं, स्तम्भाः साक्षाद् भगवद्विग्रहश्च भवति । तथा एकत्वम् अनुभवतः भक्तस्य कथं न भक्तिव्यवहारः स्याद् ? इयमेव ज्ञानोत्तर–अद्वैतभक्तिः एकान्तभक्तिः इत्यपि नाम्ना प्रसिद्धा वर्तते । एकनाथवर्यः एकान्तभक्तिं प्रतिपादयति –

ऐसे अभेद माझे भजन या नाव एकान्तभक्ति जाण ।
मजवेगळे काही भिन्न । न देखे आन जगामाजी ।।[37]

अत्र भक्तेः पराकाष्ठां सूचयन् भगवान् वदति यत् अद्वैतभक्त्या युक्तः भक्तः सर्वत्र मामेव पश्यति स्वात्मानमपि भगवद्बुद्ध्या गृह्णाति । अत एव अद्वैतभक्तेः आनन्दं संप्राप्तस्य तदनुभवप्रतिपादनवेलायामुच्यते –

दर्पणी पाहता रूप न दिसे आपुले ।
बापरखुमादेविवरु विठ्ठले मज ऐसे केले ।।[38]

दर्पणं पश्यामि चेत् दर्पणेऽपि श्रीपाण्डुरङ्ग एव दृश्यते एवं स्वात्मा पाण्डुरङ्गात्मना परिवर्तितः ।अहं सम्प्रति पाण्डुरङ्गाकारं प्राप्तवान् इति ।

यथा परिपक्वस्य फलस्य तिक्तत्त्वमपगच्छति माधुर्यञ्च वर्धते तद्वद् भगवद्भक्त्या परिपक्वतां सम्पाद्य भक्तोऽपि कामक्रोधादिरहितः सन् स्वयं पाण्डुरङ्गो भवति ।जीवपरमात्मनोः एवम् अद्वैतस्याविर्भावः जायते ।

आठव नाठव गेला भावाभाव झाला स्वयमेव पाण्डुरङ्ग ।[39]

भक्त्या सकलदोषराहित्यं सम्प्राप्य अहं स्वयमेव पाण्डुरङ्गः अभवम् । सम्प्रति भक्तः देवश्च उभावपि अहमेव इति भावः ज्ञानोत्तरभक्तौ भवति । भक्त्या जीवब्रह्मणोः कथं वा अभेदः स्यादिति सम्प्रदायाचार्याः सोदाहरणं प्रमाणयन्ति –

भ्रमरीच्या ध्यासे भ्रमरीच होय । कीटकत्व जाय पालटोनि ।।
ब्रह्म ध्यास स्वये ब्रह्मचि होइजे । जीवत्व लोपिजे सहजचि ।।[40]

कीटः सर्वदा भ्रमरं ध्यायन् अन्ततो गत्वा भ्रमर एव भवति । कीटकत्वं परित्यज्य भ्रमरमाध्यमेन भ्रमररूपतामेव प्राप्नोति । तद्वत् भक्तोऽपि भगवद्भक्त्या अविच्छिन्नरूपेण अखण्डधाराप्रवाहवत् भगवच्चिन्तनं कुर्वन् भगवाएव भवति । एवंरीत्या जीवः ब्रह्मरूपतां प्राप्नोति । जीवस्य ब्रह्मभावप्राप्तिरेव ज्ञानोत्तरभक्तेः परिणामः ।

उपसंहारः

उपनिषत्सु परापरभेदेन विद्यायाः द्वैविध्यं प्रतिपाद्य अथ परा यया तदक्षरमधिगम्यते।[41] इति पराविद्यया ब्रह्मज्ञानस्वरूपं प्रतिपाद्यते । एवं तच्च ब्रह्मज्ञानं जीवब्रह्मैक्यात्मकं भवति । इदञ्च जीवब्रह्मैक्यात्मकं ब्रह्मज्ञानमवाप्य सः ज्ञानी चराचरात्मकेऽस्मिन् प्रपञ्चे सर्वत्र सर्वेषु तथा स्वात्मन्यपि परमात्मानमेव अनुभवति । एवं द्वैतबुद्धि विनाय अद्वैतबुद्धि उदेति । उच्यते च –

ब्रह्मज्ञानी पुरुष तोचि ओळखवा नयनांजनि पहावा ब्रह्मठसा ।
देखतसे देही द्वैतभेदातीत तोचि धन्य सन्त माझे मनी ।।[42]

ब्रह्मज्ञानिनः सर्वत्र समबुद्धिः समदृष्टिश्च भवति । इदं सर्वमपि जगत् तस्य आत्मैव अभवत् । अतः स द्वितीयाभावात् अद्वैतमेव अनुभवति । पराविद्यायाः योऽयं अद्वैतानुभवः वर्तते सैव अनुभवः ज्ञानोत्तरभक्तेरपि भवति । तस्मादेव सन्तज्ञानेश्वरः पराविद्या तथा पराभक्तिः एतयो अभिन्नत्वमेव प्रस्थापयति । ज्ञानेश्वरमतानुसारं ब्रह्मज्ञानिनां यः अद्वैतानुभवः, आत्मज्ञानपुच्यते तदेव आत्मज्ञानम् अद्वैतानुभवं वयं परमभक्तिः इति वदामः –

ज्ञानी इयेते स्वसंविती । शैव म्हणती शक्ति ।
आम्ही परमभक्ति । आपुल म्हणो ।[43]

एवं ब्रह्मज्ञानिनाम् आत्मज्ञानम् एवं परा भक्तिः एकस्यैव आत्मानुभवस्य भिन्ननामानि वर्तन्ते । सन्तज्ञानेश्वरः तावत् सकलमनुष्याः स्वभावतः भजनशीलाः

भक्तियुक्ताश्च भवन्ति इति वर्णयति । सामान्यानां सर्वेषामपि स्वभावतः भक्तेः आकर्षणं, प्रवृत्तिश्च भवति। सामान्याः ज्ञानाभावात् अज्ञानवशाच्च भेदबुद्धिं कल्पयित्वा अनेकत्वं पश्यन्ति । यदा भक्तिः ज्ञानस्य अधिष्ठानं लभते यदा च भक्तिः ज्ञानसम्पन्ना भवति। तदा पूर्वोक्तं अज्ञानवशात् भासमानं चित्रं परिवर्तते । पराभक्तिः तथा पराविद्या एतयोः अभेदं प्रकटयन् ज्ञानेश्वरः कथयति –

ते ज्ञानानिष्ठा अथ हातवसे । तेथे भक्ति माझी उल्लासे ।
तिया मजसी समरसे । सुखिया होय ।।[44]

यदा ज्ञाननिष्ठा भवति तदा ईश्वरे भक्तिः जायते । अनया एव परमभक्त्या ज्ञानीभक्तः ईश्वरेण सह समत्वं ऐक्यञ्च अनुभूय अद्वैतानन्देन परिपूर्णः भवति । ज्ञानोत्तरभक्त्या जीवब्रह्मणोः ऐक्यं सम्पाद्य परमसुखसमन्वितोऽयं भक्तः **आपण तरेल ते नवल कुळे उद्धरिल सर्वांची तो ।**[45] इति अभंगोक्तरीत्या स्वानुभवसिद्धं संसारतरणोपायं ज्ञानोत्तरभक्तिमार्ग मुक्तहस्तैः सकललोककल्याणाय प्रदातुं प्रयतते।

एवं ज्ञानोत्तरभक्त्या ब्रह्मभावमवाप्य तद्भावापत्तिः सर्वेषामेव जीवानां स्यादिति सद्धेतूना प्रेरिताः ब्रह्मज्ञानिनः मोक्षप्रदायकं स्वानुभवसिद्धं ब्रह्मज्ञानं भक्तिमार्गपुरस्सरमेव जनेषु प्रसारयन्ति । एवञ्च ज्ञानस्य प्रसारार्थमपि भक्तिरेव शिरोधार्या ब्रह्मज्ञानिभिः इति भक्तेः श्रेष्ठत्वमेव वर्तते । सन्तज्ञानेश्वरः भक्तियोगे भक्तिमार्गं प्रतिपादयन् वदति –

जे पुरुषार्थसिद्धी चौथी । घेऊनि आपुलां हाती ।
रिगाला भक्तिपंथी । जगा देतु ।[46]

।।इति शम् ।।

सन्दर्भ ग्रंथ सूची

1. भजनि मालिका, अ. 67
2. सार्थ तुकाराम गाथा, अ. 236, पृ. 72
3. सार्थ तुकाराम गाथा, अ. 236, पृ. 174
4. भजनि मालिका, अ. 1041, पृ. 174
5. भजनि मालिका, अ. 1621, पृ. 192
6. सार्थ तुकाराम गाथा, अ. 2240, पृ. 490
7. पाण्डुरंगाष्टकम् 1
8. संत ज्ञानेश्वर अभंग गाथा

9. पण्ढरी महात्म्य, पृ. 274
10. संत एकनाथ गाथा, पृ. 96
11. पाण्डुरंगाष्टकम् 5
12. सार्थ तुकाराम गाथा, अ. 214, पृ. 67
13. ज्ञानेश्वरी, 12–16
14. सार्थ तुकाराम गाथा, अ. 21, पृ. 9
15. नित्यपाठ, भ. 8, पृ. 5
16. एकनाथी भागवत – 811
17. नित्यपाठ, पृ. 2
18. ज्ञानेश्वरी , 12–4
19. एकनाथी भागवत – 811
20. भजनी मालिका
21. भजनी मालिका
22. भजनी मालिका, 952
23. भजनी मालिका, 74
24. भजनी मालिका, 832
25. भजनी मालिका
26. ज्ञानेश्वरी, 9.166, पृ. 463
27. तत्रैव
28. ज्ञानेश्वरी, 9.127, पृ. 409
29. तत्रैव
30. तत्रैव
31. ज्ञानेश्वरी, 7.96, पृ. 320
32. ज्ञानेश्वरी, 9.96 पृ. 320
33. एकनाथी भागवत, पृ. 811
34. भजनी मालिका, 957,पृ. 176
35. भजनी मालिका, 967, पृ. 181
36. ज्ञानेश्वरी, 9.76 पृ. 756
37. एकनाथी भागवत, पृ. 890
38. ज्ञानेश्वर अभंगगाथा, 180
39. भजनी मालिका, 910
40. ज्ञानेश्वर अभंगगाथा, 184
41. मुण्डकोपनिषद् –

42. ज्ञानेश्वर अभंगगाथा, 195
43. ज्ञानेश्वरी 1120
44. ज्ञानेश्वरी 12.36
45. नित्यपाठ
46. ज्ञानेश्वरी 15.43

■ ■ ■

रघुवंशमहाकाव्ये विविधालङ्कारिकसम्प्रदायानामुदाहरणानि

डॉ. पराग जोशी

इह खलु जगति सदुपदेशवाक्यं त्रिधा विभक्तं प्रभुसम्मितं, सुहृत्सम्मितं, कान्तासम्मितं चेति । तत्राद्यं तावत् वेदः, द्वितीयं पुराणम्, तृतीयं पुनः काव्यमिति। तत्र सुकुमारमतीनामपि कर्तव्याकर्तव्यबोधकस्य काव्यस्य सकलजनग्राह्यत्वं सम्पन्नम् । तादृशकाव्यस्य मीमांसा यत्र क्रियते तच्च शास्त्रं साहित्यमिति प्रख्यातमस्ति । शास्त्रमिदं शास्त्रान्तराणीव परमोपादेयं शास्त्रम् । लौकिकानां वैदिकानाञ्च विषयाणां सर्वाङ्गीणतया ज्ञानं तावन्न भवितुर्महति यावदस्य शास्त्रस्य ज्ञानं न वर्तते । आसप्तमशताब्दं प्रादुर्भूतेष्वलङ्कारग्रन्थेषु निरूपमधिषणावैभवविभासितानां कविशिक्षाधुरन्धराणां भरताद्याचार्याणां प्रतिभया यथा आलङ्कारिकभारती सम्पूर्णशास्त्रीयगौरवम् अविन्दत तथैव नितान्तरमणीयैः काव्यग्रन्थैः शास्त्रस्यास्य काव्यमार्गं सहृदयेषु सानन्दं प्रसारयन् महाकविः कालिदासः काव्यभारतीं सगौरवं प्रतिष्ठापयत् । अत एव लक्ष्यलक्षणग्रन्थात्मकं साहित्यशास्त्रमिदं जनमनांसि रञ्जयितुम् अप्रभवत् । शास्त्रस्यास्य लक्ष्यग्रन्थेषु नैके काव्यविधाः सरसं वर्णिताश्चेत् लक्षणग्रन्थेषु काव्यतत्त्वानां मीमांसा कृता । काव्यसौन्दर्यवर्धनाय शास्त्रेऽस्मिन् गुणदोषरीत्यलङ्कार–ध्वनिरसादि तत्त्वानां निरूपणं कृतं वर्तते । यथोक्तं –

''शब्दार्थौ मूर्तिराख्यातौ जीवितं व्यङ्ग्यवैभवम् ।
हारादिवदलङ्कारास्तत्र स्युरूपमादयः ।।
माधुर्यादयो गुणास्तत्र शौर्य्यादय इव स्थिताः।
आत्मोत्कर्षावहास्तत्र स्वभावा इव रीतयः।
शोभामाहार्यिकीं प्राप्ता वृत्तयो वृत्तयो यथा ।

पदानुगुण्यविश्रान्तिः शय्या शय्येव सम्मता ।।
रसास्वादप्रभेदाः स्युः पाकाः पाका इव स्थिताः ।
प्रख्याता लोकविद्येयं सामग्री काव्यसम्पदः ।।

अत्र स्पष्टं प्रतिपादितमस्ति यत् गुण–दोष–रीति–वृत्ति–ध्वनि– रस–अलङ्कारादयः एव काव्यसम्पदः इति । एते सर्वेऽपि काव्यसौन्दर्यवर्धकाः भवन्ति । एतैरेव काव्यं सुललितं, सुमधुरं, आस्वाद्यञ्च जायते इति । अत एव अलङ्कारशास्त्रे भरतमुनेः आरभ्य जगन्नाथपण्डितं यावत् नैके आलङ्कारिकाः तथैव कालिदासात् आरभ्य जयदेवं यावत् नैके साहित्यिकाः स्वस्वग्रन्थेषु काव्येषु च एतेषां गुणरीत्यलङ्काराणां विवेचनमकुर्वन् । तस्मादेव खलु सूक्तं –

साहित्यसागरं हित्वा को व्रजेत् विबुधालयम् ।
आयान्ति विबुधास्तत्र मन्थनाय यतो मुहुः ।। (सा.पा.पृ. 42)

यावदेवालोच्यते साहित्यं तावदेव तत्र उत्तरोत्तरं माधुर्यं समनुभूयते सहृदयैः । अत एव साहित्यविद्यायाः गभीरात् गभीरतरमालोचनं विधाय नैकानि शास्त्रतत्त्वानि प्रतिपादितानि काव्यतत्त्वविद्भः । तान्येव गुण–रीति–अलङ्कार–रस–ध्वनिनामकानि तत्त्वानि सुशोभयन्ति शास्त्रमिदम् । तस्मादेव साहित्यशास्त्रमनेकधा विततं श्लाघनीयं विराजते । प्रायशो विंशतिशताब्देभ्यः प्रभृति शास्त्रमेतत् कालक्रमेण प्रवर्धमानं कविभारतीसमुपासकानां ज्योतिर्मयं मार्गमुपदिशति । शब्दार्थमयशरीरस्य काव्यस्य साङ्गोपाङ्गं सुन्दरं विवेचनं सर्वैरपि आलङ्कारिकैः स्वीयग्रन्थेषु कृतं दृश्यते । किन्तु काव्यस्यास्य आत्मतत्त्वं किमिति जिज्ञासायां सर्वेषामपि मतानि सुतरां विभिन्नानि दृश्यन्ते । 'काव्यस्यात्मा ध्वनिरिति'[3] उद्घोषयन् आनन्दवर्धनः ध्वनेः आत्मतत्त्वं काव्ये स्वीकरोति । 'वक्रोक्तिः काव्यजीवितम्'[4] इति कथयन् आचार्य कुन्तकः वक्रोक्तिं काव्यात्मारूपेण स्थापयति । 'अलङ्काररहिता तु विधवैव सरस्वती'[5] इति वदन्तः आलङ्कारिकाः अलङ्कारमेव काव्यस्य आत्मतत्त्वेन मन्वते । 'रीतिरात्मा काव्यस्य'[6] इति वामनाचार्याणां मतम् । 'न हि रसादृते कश्चिदर्थः प्रवर्तते'[7] इति प्रतिपादयन्तः रसवादिनः काव्यस्यात्मा रस इति प्रत्यपादयन् चेत् 'औचित्यम् अनुधावन्ति सर्वे रसगुणादयः'[8] इति ब्रुवन क्षेमेन्द्र औचित्यस्य काव्यजीवितत्त्वं प्रतिपादयति । इत्थं शब्दार्थमयशरीरस्य काव्यस्य आत्मतत्त्वं किमिति पृष्टे केचन ध्वनिम्, अपरे वक्रोक्तिम्, इतरे रीतिम्, अन्ये अलङ्कारशास्त्रे प्रादुर्भूताः षट् आलङ्कारिकसम्प्रदायाः । एतेषां सम्प्रदायानां कालिदासेन रघुवंशमहाकाव्ये कथं प्रतिपादनं कृतमिति अत्र प्रस्तूयते ।

'क इह रघुकारे न रमते'[9] इति वाक्यं द्योतयति संस्कृतकाव्यवाङ्मये रघुवंशमहाकाव्यस्य उन्नतं स्थानम्। संस्कृतकाव्यप्रपञ्चस्य लघुत्रय्यां सर्वोत्कृष्टं स्थानं भजते रघुवंशमहाकाव्यम् । निरूपमधिषणावैभव– विभासितस्य, कविशिक्षाधुरन्धरस्य, कविताकामिनीविलासस्य, कविकुलगुरोः कालिदासस्य ललितवाण्या परिपूर्णगौरवतां गतं रघुवंशमहाकाव्यम् । वागर्थप्रतिपत्तये वागर्थाविव सम्पृक्तौ पार्वतीपरमेश्वरौ नमस्कृत्य ग्रथितमिदं महाकाव्यं रघुणामन्वयं वक्ति । उपविंशसर्गेषु वर्णितः इक्ष्वाकुवंश महाकवेः ज्ञानवैभवस्य परिचायकः विद्यते। सूर्यप्रभववंशीयराज्ञां दीपशिखाकालिदासेन कृता समाराधना तस्य यशःप्राप्तये फलिता । काव्यदृष्ट्या कथादृष्टया अनुपममिदं महाकाव्यं कवेः समन्वयात्मकदृष्टेः प्रतीकमस्ति । अस्मिन् काव्ये कविना वैचारिकपक्षेन साकं स्वीयहृदयपक्षोऽपि उपस्थापितः। आजन्मशुद्धानां यथाविधिहुताग्नीनां, त्यागाय संभृतार्थानां, प्रजायै गृहमेधिनां रघूणामन्वयं प्रतिपादयता कालिदासेन अस्मिन् महाकाव्ये रागविरागस्य, त्यागभोगस्य, आकर्षणविकर्षणस्य, किं बहुना शरीरात्मनोः समन्वयः साधु वर्णितः। लोकोत्तरवर्णनानिपुणेन अनेन महाकविना स्थावरजङ्गमस्य लोकस्य वृत्तं हृदयङ्गमतया वर्णितम् । काव्यदृष्ट्या नितान्तरमणीयं रसिकानन्दजनकमिदं महाकाव्यं महाकविना कालिदासेन काव्यशास्त्रदृष्टया अपि विबुधानन्दजनकम् अकारि । काव्यशास्त्रस्य समेषामपि काव्यतत्त्वानाम् उचितरूपेण यथाप्रदेशं विनिवेशनेन काव्यमिदं महाकाव्यत्वेन गणितमभवत् । अलङ्कारशास्त्रस्य सम्प्रदायेषु प्रतिपादिताः रसध्वनि–अलङ्कार– रीति–वक्रोक्ति–औचित्यधर्माः रघुवंशमहाकाव्ये यथायोगं विनिवेशिताः दृश्यन्ते । एतेषाम् आलङ्कारिकसम्प्रदायानां दृष्टया रघुवंशमहाकाव्यस्य विवेचनमत्र क्रियते।

रघुवंशमहाकाव्ये ध्वनिसम्प्रदायः –

'काव्यस्यात्मा ध्वनिः'[10] इति आघोषयन् सहृदयहृदयानन्दवर्धकेन आनन्दवर्धनेन ध्वनिसम्प्रदायः उपस्थापितः । सम्प्रति साहित्ये मूर्धाभिषिक्तोऽयं ध्वनिः तत्परवर्तिभिः आचार्यैः पोषितः पुष्पितश्च । यद्यपि रामायणादिषु लक्ष्यग्रन्थेषु समाम्नातपूर्वः ध्वनिः, किन्तु सर्वप्रथमम् आनन्दवर्धन एव ध्वन्यालोके अन्येभ्यः काव्यतत्त्वेभ्यः ध्वनिं पृथक्कृत्य स्वतन्त्रतया काव्यात्मत्वेन स्वीकृतवान् । यत्र शब्दार्थौ स्वार्थं गौणरूपेण उपस्थाप्य व्यङ्ग्यमर्थम् अभिव्यञ्जयतः सः ध्वनिः ।

यथोक्तं तेन –

''यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।।''[11]

प्रसिद्धावयवातिरिक्तम् अङ्गनासु यथा लावण्यं तथायं प्रतीयमानार्थः अन्यदेव वस्तु इति आनन्दवर्धनः । ध्वनिकाव्यम् उत्तमकाव्यत्वेन स्वीकुर्वन् आचार्यमम्मटः कविराजविश्वनाथोऽपि ध्वनेर्महत्वं काव्ये स्वीकरोति । ईदृशस्य प्रतीयमानार्थस्य ध्वनेः वर्णनायां प्राप्तनैपुण्यः महाकविकालिदासः 'स्थिताः क्षणं पक्ष्मसु'–[12] वा 'एवं वादिनि देवर्षौ'[13] इत्यनेन उदाहरणेन कुमारसम्भव ध्वनिवर्णनम् अतिवसुन्दरतया अकरोत् । तथैव रघुवंशमहाकाव्येऽपि यथा –

''बभूव रामः सहसा सबाष्पस्तुषारवर्षीव सहस्यचन्द्रः ।
कौलीनभीतेन गृहान्निरस्ता न तेन वैदेहसुता मनस्तः ।।''[14]

लक्ष्मणात् प्राप्तं वैदेहीसन्देशं श्रुत्वा तुषारवर्षीव पौषचन्द्र इव रामस्य नेत्रयोः अश्रूपातः अभवत् । यतः स्वेच्छया सः सीतापरित्यागं नाकरोदपितु लोकापवाद भयात् । अत्र महाकविना ध्वनेः उपयोगं कृत्वा अर्थवैभवं साधितम् । नितान्तध्वन्यात्मकतया परिस्थितेः क्रूरत्वं प्रदर्शितम् । अपरत्र महाकविकालिदासः एवमेव ध्वनिमुपयुज्य रमणीयार्थं प्रतिपादयति यथा –

''तत्र स्वयंवरसमाहृतराजलोकं कन्याललाम कमनीयमजस्य लिप्सोः ।
भावावबोधकलुषा दयितेव रात्रौ निद्रा चिरेण नयनाभिमुखी बभूव ।।[15]

इन्दुमतीस्वयंवरार्थम् आगतस्य अजस्य परिस्थितिं वर्णयन् वदति कालिदासः यत् कन्याललाम लिप्सोः अजस्य भावावबोधे पुरुषस्याभिप्रायपरिज्ञाने असमर्था दयितेव रात्रौ निद्रा चिरेण नयनाभिमुखी बभूव । अत्र प्रयुक्तानि लिप्सा, कन्याललाम भावावबोधकलुषा दयिता इत्येतानि पदानि प्रतीयमानार्थप्रतिपादकानि । मल्लिनाथः अपि व्याख्याति यदत्र 'कामिनं राजानं चौरं प्रविशन्ति प्रजागराः' इति भावः ।[16] अत्रैव पञ्चमे सर्गे अपरमुदाहरणं ध्वनेः यथा –

''उपात्तविद्यं विधिवद् गुरुभ्यस्तं यौवनोद्भेदविशेषकान्तम् ।
श्रीः साभिलाषाऽपि गुरोरनुज्ञां धीरेन कन्या पितुराचकाङ्क्ष ।।[17]

गुरुभ्यो यथाशास्त्रमुपात्तविद्यं यौवनाविर्भावात् कान्तं तमजं प्रति साभिलाषाऽपि श्रीः स्थिरा धीरा कन्या इव पितुरनुज्ञाम् आचकाङ्क्ष इति । अत्र सञ्जीवनीटीकाकारः मल्लिनाथः स्पष्टं ब्रूते यदत्र श्लोके अजः यौवराज्यार्होऽभूदित्यर्थः । अनुज्ञाशब्दात् पितृपारतन्त्र्यमुपमासामर्थ्यात् पाणिग्रहणयोग्यता च ध्वन्यते ।

कालिदासः मानवहृदयस्य सुकुमारभावानां वर्णने निपुणः । अज

इन्दुमतीविलापप्रसङ्गे तथा त्रयोदशसर्गे सीताविलापप्रसङ्गे स्वाभाविकं भावपूर्ण वर्णनं विधाय सः रमणीयार्थप्रतिपादनेन ध्वनिमार्गस्य अनुकरणम् अकरोत् । यथा –

''सैषा स्थली यत्र विचिन्वतां त्वां भ्रष्टं मया नुपूरमेकमुर्व्याम् ।
अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम् ।।[18]

विश्लेषदुःखादिव बद्धमौनं नुपूरमिति संवर्ण्य कालिदासः व्यञ्जनया दुःखस्य कठोरतां प्रतिपादयति । तत्पूर्वस्मिन् श्लोके कालिदासेन ध्वनेरूपयोगं कृत्वा सीतायाः कृते धैर्यवचनानि प्रदत्तानि यथा –

''करेण वातायनलम्बितेन स्पृष्टरत्त्वया चण्डि कुतूहलिन्या ।
आमुञ्चतीवाभरणं द्वितीयमुद्भिन्नविद्युद्वलयो घनस्ते ।।''[19]

अत्र चण्डीत्यनेन क्रोधनशीलत्वात् भीतः क्षिप्रं त्वां मुञ्चति इति व्यज्यते । इन्दुमतीस्वयंवरप्रसङ्गेऽपि सुनन्दामाध्यमेन तस्याः वाक् चातुर्येण महाकविकालिदासेन राज्ञां परिचयावसरे बहुधा ध्वन्यर्थः श्लोकेषु न्यस्तः, यथा –

''निसर्गाभिन्नस्पदमेकसंस्थमस्मिन्द्वयं श्रीश्च सरस्वती च ।
कान्त्या गिरा सूनृतया च योग्या त्वमेव कल्याणि तयोस्तृतीया ।।[20]

अत्र समानगुणयोः युवयोः दाम्पत्यं युज्यत इति प्रतिपाद्य अङ्गराजस्य दक्षिणनायकत्वं ध्वनितम् । तदुक्तं – 'तुल्योऽनेकत्र दक्षिणः' इति । अन्यत्र पाण्ड्यराज्ञः वर्णने उच्यते –

''अनेन पाणौ विधिवद्गृहीते महाकुलीनेन महीव गुर्वी ।
रत्नानुविद्धार्णवमेखलाया दिशः सपत्नी भव दक्षिणस्याः ।।[21]

अत्र दक्षिणस्याः दिशः सपत्नी भव इत्यनेन सपत्न्यन्तराभावो ध्वन्यते । इत्थं रघुवंशमहाकाव्ये ध्वनिसम्प्रदायोक्तस्य ध्वनितत्त्वस्य यथावत् उपयोगं विधाय कालिदासेन काव्यमिदं रमणीयं व्यधायि ।

रघुवंशमहाकाव्ये रससम्प्रदायः –

काव्यं पठतः श्रुण्वतः अभिनेयार्थञ्च पश्यतः सहृदयस्य पुलकाद्यनुभाविका कापि अलौकिकी स्थितिर्जायते, सा च रसानुभवकारणादेव इति काव्यतत्ववेतॄणां मनीषा । रस्यते आस्वाद्यते इति रसः इति निष्पत्त्या प्रतिपादितोऽयं रसः चमत्कारं जनयति काव्ये ।

उक्तं यथा –

> ''दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात् ।
> सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः ।।''[22]

ज्ञायते यत् आनन्दो हि काव्यस्य चरमं प्रयोजनम् । तस्यानन्दस्य साधनं भवति रसः। रसास्वादनात् एव आनन्दः समुद्भवति । आह च आचार्यमम्मटः 'सकलप्रयोजनमौलिभूतं,समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्' इत्यादि । उक्तं चोपनिषदि 'रसो वै सः, रसं ह्येवायं लब्ध्वा आनन्दी भवति।' अलौकिकानन्दस्य अस्य रसस्य रसास्वादने वर्णने च निपुणः महाकविः कालिदासः स्वकाव्येषु काव्यात्मभूतं रसं रसिकतया संवर्ण्य स्वीयकाव्यानि रसान्वितानि अकरोत् । ध्वनिसम्प्रदायस्यापि इदमेव मतं यत् वस्त्वलङ्कार रसध्वनिषु रसध्वनिरेव काव्यस्यात्मा । विश्वनाथोऽपि रसात्मकं वाक्यमेव काव्यमिति उदीर्य काव्ये रसमहत्त्वं प्रत्यपादयत् । साहित्यशास्त्रे नवरसाः प्रसिद्धाः । समेषामपि रसानां वर्णने निपुणः कालिदासः विशेषतया शृङ्गारकारुण्ययोः वर्णने विशिष्टां रूचिं वहति । तस्य शृङ्गाररसस्य वर्णनं वीक्ष्य जयदेवः कालिदासं कविताकामिन्याः विलासरूपेण वर्णयति। विशिष्य मेघदूते, कुमारसम्भवे च सम्भोगविप्रलम्भात्मकशृङ्गाररस्य वर्णनमस्ति । रघुवंशमहाकाव्यमपि कालिदासस्य अनेन रसवर्णनवैशिष्ट्येन विभूषितं विद्यते । रघुवंशमहाकाव्ये प्रकृत्याः उपादानैः सह तादात्म्यं प्रदर्श्य कविता शृङ्गाररसस्य सृष्टिः साधु वर्णिता यथा –

> ''त्यजत मानमत्वं बतविग्रहैर्न पुनरेति गतं चतुरं वयः ।
> परभृताभिरितीव निवेदिते स्मरमते रमते स्म वधूजनः।।''[23]

अत्र वसन्तवर्णनमुपलक्ष्य शृङ्गाररसस्य परिपाकः कालिदासेन प्रदर्शितः। कालिदासः रससिद्धकविः। अत्यल्पशब्देषु योग्यवचनेषु रसं व्यञ्जयितुं सः समर्थः। शृङ्गाररसं प्रति कालिदासस्य विशेषानुरागः। यथा –

> ''अत्रानुगोदं मृगयानिवृत्तस्तरङ्गवातेन विनीतखेदः।
> रहस्त्वदुत्सङ्गनिषण्णमूर्धा स्मरामि वानीरगृहेषु सुप्तः।।''[24]

सीतायाः मधुरस्मरणानि संयोगशृङ्गारमत्र पोषयन्ति। तथैव विप्रलम्भशृङ्गारः यथा

> ''अयं सुजातोऽनुगिरं तमालः प्रवालमादाय सुगन्धि यस्य ।
> यवाङ्कुरापाण्डुकपोलशोभी मयाऽवतंसः परिकल्पतस्ते ।।[25]

यथा शृङ्गारे तथैव करुणरसनिष्यन्देऽपि कालिदासः निपुणः । रघुवंशमहाकाव्ये इन्दुमतीविरहेन पीडितः अजः, सीतावियोगेन दुःखितः रामः कालिदासस्य कारुण्यं चारू परिप्लावयतः । यथा रघुवंशस्य अष्टमे सर्गे इन्दुमतीवियोगेन अजस्य विलापः नाम कारुण्यस्य परमावधिः –

''स्रगियं यदि जीवितापहा हृदये किं निहिता न हन्ति माम् ।
विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया ।।[26]

अपि च, ''गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम् ।। [27]

उभयत्रापि अजस्य विलापदुःखं कारुण्यमुखेन सान्द्रं परिपोषितं कालिदासेन, एषा एव स्थितिः सीतावियोगी रामस्य । रावणद्वारा सीतायाः अपहरणात्परं प्रियावियोगी श्रीरामस्य दुःखं हृदयस्पर्शं करोति । यथा –

''एतद्गिरेर्माल्यवतः पुरस्तादाविर्भवत्यम्बरलेखि शृङ्गम् ।
नवं पयो यत्र धनैर्मया च त्वद्विप्रयोगाश्रु समं विसृष्टम् ।।[28]

साक्षात् भगवतो श्रीरामचन्द्रस्य विप्रयोगाश्रुपातः अत्र कारुण्यमुखेन कालिदासेन प्रदर्शितः । अन्यत्र तत्रैव अन्यस्मिन् प्रसङ्गे यथा –

''सैषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया नुपूरमेकमुर्व्याम् ।
अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम् ।।[29]

आहत्य रघुवंशकाव्ये महाकविना कालिदासेन शृङ्गारस्य उभावपि भेदौ, करुणरसश्च साधु वर्णित एव । तथैव रघुदिग्विजययात्रामुखेन वीररसस्य भयानकरसस्य प्रतिपादनमपि सुष्टु कृतम् । आश्रमतपोवासिनां वर्णनेषु शान्तरसस्य अभिव्यक्तिरपि क्वचित् दृश्यते चेत् मन्दं हासोऽपि प्रदर्शितः । इत्थं काव्यात्मभूतं रसं रघुवंशमहाकाव्ये संवर्ण्य कालिदासः रससम्प्रदायस्य उपस्थापनमकरोत् । सर्वोत्कृष्टस्य रसध्वनेः वर्णनं कुर्वन् आनन्दवर्धनेन यदुल्लिखितं – ''क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः''[30] तस्यैवानुकरन् कुर्वन कालिदासः अपि काव्यस्य रसात्मभूतत्वं प्रतिपादयन् अवर्णयत् यथा –

''तामभ्यगच्छद्रुदितानुकारी कविः कुशेध्माहरणाय यातः ।
निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः ।।''[31]

रघुवंशमहाकाव्ये रीतिसम्प्रदायः —

'रीतिरात्मा काव्यस्य' इति स्पष्टोक्त्या वामनेन रीतेः काव्यस्य आत्मत्वेन प्रतिपादनं कृतम् । का नाम रीतिः इति प्रश्ने रीतिसिद्धान्तप्रवर्तकेन वामनेन रीतिलक्षणं प्रतिपादितं यथा —

''विशिष्टा पदरचना रीतिः । विशेषो गुणात्मा ।''[32]

अत्र पदरचनावैशिष्ट्यं रीतिपदेन अभिप्रैतम् । स च विशेषः गुणरूपः । अत एव रीतिसम्प्रदायः गुणसम्प्रदायस्य नाम्नाऽपि अभिधीयते । पद्धतिः, शैली इत्यादयः रीतेरर्थबोधकाः पर्यायशब्दाः । रीतिर्नाम विशिष्टगुणसमवेता पदसंघटना । केचन 'रसोचितशब्दार्थनिबन्धनं रीतिः' इत्यपि अवदन् । वैदर्भी, गौडी, पाञ्चाली चेति तिस्रः रीतयः । आसु सुप्रसिद्धा वैदर्भीरीतिः वैदर्भीरीतेः लक्षणमित्थस्ति 'वैदर्भी ललितक्रमा' इति । कालिदासस्तु वैदर्भीमाश्रित्यैव स्वकाव्यानि अलिखत् । तद्विषये उच्यतेऽपि यत् —

''वैदर्भीरीतिसन्दर्भे कालिदासो विशिष्यते''

कालिदासः वैदर्भीरीतेः मूर्धन्यः कविः । उच्यते यत्, वैदर्भीरीतिः तस्मिन्नेव जायते य उत्कृष्टकाव्यरचनासमर्थः, पुण्यात्मा कविर्भवति । इयं वैदर्भीरीतिः श्रवणेन्द्रियानन्दप्रदायिनी, मेघं विनाऽपि सुधावर्षिणी, वाग्विलासस्य जननी इति उच्यते यथा —

''अनभ्रवृष्टिः श्रवणामृतस्य सरस्वती विभ्रमजन्मभूमिः ।
वैदर्भरीतिः कृतिनामुदेति सौभाग्यलाभप्रतिभूः पदानाम् ।।''[34]

रघुवंशमहाकाव्ये सर्वत्र वैदर्भरीतेः प्रयोगः दृश्यते । मधुरशब्दानामुपयोगः लालित्यपूर्णरचना, समासानां सर्वथा अभावः, प्रसादगुणश्च वैदर्भीरीतिं सुललितं करोति । तस्याः दर्शनं प्रतिक्षणं रघुवंशमहाकाव्ये जायते यथा —

''एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च ।
अल्पस्य हेतोर्बहुहातुमिच्छन् विचारमूढः प्रतिभासि मे त्वम् ।।[35]

महाकवेः कालिदासस्य भाषा सरला मनोरमा च विद्यते । दीर्घसमासानामभावः तत्काव्यं सरलीकरोति यथा —

''सा दुष्प्रधर्षा मनसाऽपि हिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन ।
अलक्षिताभ्युत्पतनो नृपेण प्रसह्य सिंहः किल तां चकर्ष ।।''[36]

चित्तव्यापकः सर्वसाधारणः प्रसादगुणः वैदर्भरीतेः हृदयं यत्र कालिदासः निपुणः। यथा –

''ताम्रोदरेषु पतितं तरुपल्लवेषु निर्धौतहारगुलिकाविशदं हिमाम्भः ।
आभाति लब्धपरभागतयाधरोष्ठे लीलास्मितं सदशनार्चिरिव त्वदीयम्।।''[37]

यथा प्रसादगुणवर्णने पारङ्गत कालिदासः तथैव माधुर्यगुणोऽपि तस्याभीष्टः गुणः ।माधुर्यगुण एव खलु शृङ्गाररसस्य आधारः। सुन्दरं वा सौन्दर्यम् इति शब्दः कालिदासाय न प्रियः । शृङ्गारवर्णने माधुर्यगुणवर्णने वा तेन मनोज्ञं , मनोहारि, मधुरं, रमणीयं, चारू, ललितं, सुभगं, रमणीयता, माधुर्यं सौभाग्यमित्यादि शब्दाः प्रयुक्ताः ।माधुर्यं यथा –

''तयोरपाङ्प्रतिसारितानि क्रियासमापत्तिनिवर्त्तितानि ।
ह्रीयन्त्रणामानशिरे मनोज्ञामन्योन्यलोलानि विलोचनानि ।।[38]

'शृङ्गारे विप्रलम्भाख्ये करुणे च प्रकर्षवत् । माधुर्यमार्द्रतां याति यतस्तत्राधिकं मनः'' इति आचार्यमम्मटमतानुसारं कालिदासः स्वकाव्येषु माधुर्यद्रुतिं तरलयति सर्वत्र ।यथा रघुवंशे माधुर्यद्रुतिः –

''तद्गीतश्रवणैकाग्रा संसदश्रुमुखी बभौ।
हिमनिष्यन्दिनी प्रातर्निवातेव वनस्थली।।''[39]

प्रातःकालीनं हिमपातमिव वनस्थली अभवत् सा संसद् यत्र सीतायाः स्मरणेन अश्रुपातोऽभवत् । वस्तुतः कालिदासः सुकुमारमार्गस्य कविः। काव्यलेखनसमये सः अत्यन्तं सावधानेन प्रयुक्तकल्पनायाः अनुरूपं शब्दम् उपयुङ्क्ते । प्रसिद्धस्य इतिहासकारस्य संशोधकस्य वि.वा. मिराशी महोदयस्य मतानुगुणं कालिदासेन रघुवंशमहाकाव्ये एकादशसर्गे सप्तचत्वारिंशद् तथा अष्टचत्वारिंशद् श्लोकयोः उपयुक्ताः समानार्थकाः शब्दाः तस्य कल्पनारुचिं स्पष्टवक्तृत्वं च प्रदर्शयन्ति । प्रथमश्लोकं विरचय्य अतृप्तः सः द्वितीयं श्लोकमरचयत् इति भाति ।यथा –

''दृष्टसारमथ रुद्रकार्मुके वीर्यशुल्कमभिनन्द्य मैथिलः ।
राघवाय तनयामयोनिजां रूपिणीं श्रियमिव न्यवेदयत् ।।''

तत्रैव अग्रिम श्लोके –

''मैथिलः सपदि सत्यसङ्गरो राघवाय तनयामयोनिजाम् ।
सन्निधौ द्युतिमतस्तपोनिधेरग्निसाक्षिक इवातिसृष्टवान् ।।''[40]

एवं श्रुतिमनोहारिण्या पदावल्या, प्रसादगुणवाण्या, माधुर्ययुक्तेन वचसा कालिदासस्य वाणी वैदर्भीरीतिं पुष्णाति ।तदर्थमेव खलु सूक्तं दण्डिना –

''लिप्ता मधुद्रवेणासन् यस्य निर्विवषा गिरः ।
तेनेदं वर्त्म वैदर्भ कालिदासेन शोधितम् ।।''[41]

रघुवंशमहाकाव्ये अलङ्कारसम्प्रदायः –

अलङ्करोति इति वा अलङ्क्रियते अनेन इति वा अलङ्कारः। यथा कटकुण्डलादयः शरीरशोभाकारिणः तद्वत् काव्यशोभाकारिणः उपमादयः ।यथा हि अङ्गनाशरीरं स्नाननिर्मलं, चन्दनसुरभितं, पट्टकौषेयभूषितं, हारकुण्डलादिमण्डितं सदैव पश्यज्जनाकर्षि भवति तथैव काव्यमपि अलङ्कारैः सुशोभितं मनोहरणाय प्रभवति । 'न कान्तमपि निर्भूषं विभाति वनिताननम्' इति सूक्तमेव ।अत एव वामनाचार्येण उच्यते यत् 'काव्यं ग्राह्यमलङ्कारात्' ।उक्तञ्च अग्निपुराणेऽपि 'अलङ्काररहिता विधवैव सरस्वती'' इति ।अलङ्काराणाम् ईदृशं महन्महत्त्वं ज्ञात्वैव कालिदासः स्वकाव्येषु यथाप्रदेशम् अलङ्काराणां विनिवेशनमकरोत् ।कालिदासे रसालङ्कारयोः वर्णनस्य अपूर्वः मणिकाञ्चनयोगः परिलक्ष्यते । उपमालङ्कारवर्णने प्राप्तवैदुण्याय कालिदासाय 'उपमा कालिदासस्य' इति बिरूदेन सम्मानयन् ।न केवलम् उपमा अपितु अर्थान्तरन्यासे, दृष्टान्तालङ्कारे च निपुणोऽयं कविः। तथैव शब्दालङ्कारान् अपि सत्यामावश्यकतायां प्रयुङ्क्ते । कालिदासकाव्येषु अलङ्कारसम्प्रदायस्य आत्मतत्त्वमलङ्कारः यथावसरं विनिवेशितः, अत एव तस्य काव्येषु सौन्दर्य परिलसति सर्वदा , तत्रापि रघुवंशमहाकाव्ये अलङ्काराणां शोभा काचिद् विनूतना एव । विषयोऽयम् अतिविशालः तस्माद् रघुवंशमहाकाव्ये वर्णितानाम् अर्थालङ्काराणां शब्दालङ्काराणां सन्दर्भान् उद्धृत्य अस्मिन् काव्ये अलङ्कारसम्प्रदायस्य स्थानं प्रतिपादयामि । तद्विवेचनं विषयवैपुल्यवशात् नात्र उपस्थाप्यते । सुधियः सर्वेऽपि सहृदयाः विषयमिमं बोद्धुमवश्यं प्रभवन्त्येव इति विश्वस्य साहसमिदम्।

1) रघुवंशमहाकाव्ये उपमालङ्कारः –

1) सञ्चारिणी दीपशिखेव रात्रौ ....[42] (दीपशिखायाः उपमा)

2) पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या ।

तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव सन्ध्या ।।[43]

3) प्रवृत्तमात्रेण पयांसि पातुमावर्त्तवेगाद् भ्रमता घनेन ।
आभाति भूयिष्ठमयं समुद्रः प्रमथ्यमानो गिरिणेव भूयः ।।[44]

4) धारास्वनोद्गारिदरीमुखोऽसौ शृङ्गाग्रलग्नाम्बुजवप्रपङ्कः।
बध्नाति मे बन्धुरगात्रि! चक्षुर्दृप्तः ककुद्मानिव चित्रकूटः ।।[45]

5) एषा प्रसन्नस्तिमितप्रवाहा सरिद्विदूरान्तरभावतन्वी
मन्दाकिनी भाति नगोपकण्ठे मुक्तावली कण्ठगतेव भूमेः ।।[46]

6) ब्राह्मं सरः कारणमाप्तवाचो बुद्धेरिवाव्यक्तमुदाहरन्ति ।[47]

7) शरीरसादादसमग्रभूषणा मुखेन सालक्ष्यत लोध्रपाण्डुना ।
तनुप्रकाशेन विचेयतारका प्रभातकल्पा शशिनेव शर्वरी ।।[48]

8) तस्य प्रसह्य हृदयं किल शोकशङ्कुः
प्लक्ष प्ररोह इव सौधतलं विभेद ।।[49]

9) भ्रमरैः कुसुमानुसारिभि प्रविकीर्णा परिवादिनी मुनेः ।
ददृशे पवनावलेपजं सृजती बाष्पमिवाञ्जनाविलम् ।।[50]

10) मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ।[51]

11) शास्त्रीयोपमाः यथा मीमांसोपमा 'अपवाद इवोत्सर्गं व्यावर्तयितुमीश्वरः'[52] इत्यत्र, व्याकरणशास्त्रोपमा 'धातोः स्थान इवादेशं सुग्रीवं संन्यवेशयत्'[53] इत्यत्र, 'पश्चादध्ययनार्थस्य धातोरधिरिवाभवत्'[54] इत्यत्र च । सांख्यदर्शनस्य उपमा पूर्वम् उक्ता एव 'बुद्धेरिवाव्यक्तमुदाहरन्ति' इत्यत्र । गृहस्थाश्रमस्य राजनीतेश्च उपमा 'नवपाणिग्रहणां वधूमिव'[55] इत्यत्र । एतादृशीमुपमा–परिपूर्णतामुपलक्ष्यैव 'उपमा कालिदासस्य' इति उक्तिः प्रसिद्धा अभवत् ।

2) रघुवंशमहाकाव्ये अर्थान्तरन्यासः –

1) विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया –[56]

2) धिगिमां देहभृतामसारताम् –[57]

3) मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः ।[58]

4) भिन्नरुचिर्हि लोकः[59]

3) **रघुवंशे दृष्टान्तलिङ्कारः** – वपुषा करणोज्झितेन इत्यत्र ।[60]

4) **रघुवंशे यमकालङ्कारः** –

1) यमवतामवताञ्च धुरिस्थितः । [61]

2) सनगरंनगरन्ध्रकरौजसः ।[62]

3) श्रमनुदं मनुदण्डधरान्वयम् ।[63]

4) सवरूणावरूणाग्रसरं रुचा ।[64]

5) वागपरुषा परूपाक्षरमीरिता ।[65]

5) **रघुवंशे श्लेषालङ्कारः** –

1) रा सेनां महतीं कर्षन् ।[66]

2) सञ्चारपूतानि दिगन्तराणि ।[67]

6) **रघुवंशे अनुप्रासालङ्कारः** –

1) भुजे भुजगेन्द्रसमानसारे ।[68]

2) इत्युद्गताः पौरवधूमुखेभ्यः ।[69]

3) भूतानुकम्पा तव चेदियं ।[70]

एवमलङ्काराणां व्यापकं रमणीयञ्च वर्णनमुपलभ्यते रघुवंशमहाकाव्ये ।

रघुवंशमहाकाव्ये वक्रोक्तिसम्प्रदायः –

'सैषा सर्वत्र वक्रोक्तिः अनयार्थो विभाव्यत' ।[71] इति उद्घोषयन्तः आलङ्कारिकाः वक्रोक्तिसम्प्रदायस्य महत्त्वं स्वीकुर्वन्ति काव्ये । आचार्यकुन्तकेन प्रवर्तितोऽयं सम्प्रदायः वक्रोक्तिमेव काव्यस्य आत्मरूपेण प्रतिपादयति । अस्य वक्रोक्तिसम्प्रदायस्य उपस्थापनमपि रघुवंशमहाकाव्ये परिलक्ष्यते । साक्षात् आचार्यकुन्तकः एव वक्रोक्तिं प्रतिपादयन् सुकुमारमार्गवर्णने स्मरति कालिदासं यथा –

''सुकुमाराभिधः सोऽयम्, सोऽयं पूर्वोक्तलक्षणः सुकुमारशब्दाभिधानः। येन मार्गेण सत्कवयः कालिदासप्रभृतयो गताः।''[72] इति । सुकुमारमार्गस्य आश्रयदाता कालिदासः कथं तत्प्रयोगं रघुवंशे अकरोदिति वैदर्भरीतिवर्णने अवलोकितमेव इति हेतोरत्र न पुनरूच्यते । अन्यत्रकुन्तकः शब्दार्थयोः स्वरूपं कथयन् यदवोचत् –

''समसर्वगुणौ सन्तौ सुहृदाविव सङ्गतौ,
परस्परस्य शोभायै शब्दार्थौ भवतो यथा।''[73]

एतस्य भावः कालिदासेन रघुवंशमहाकाव्यस्य मङ्गलाचरणे स्पष्टीकृतः। पुनश्च वक्रोक्तिं वर्णयता आचार्यकुन्तकेन शब्दार्थस्वरूपकथनावासरे रघुवंशस्य 'तामभ्यगच्छद्रुदितानुसारी'[74] इत्ययं श्लोकः उदाहृतः ।अपरत्र वक्रोक्तेः वाक्यवक्रतां वर्णयता आचार्यकुन्तकेन कालिदासः स्मृतः यथा –

''उपस्थितां पूर्वमपास्य लक्ष्मीं वनं मया सार्धमसि प्रपन्नः।
त्वामाश्रयं प्राप्य तया नु कोपात्सोढाऽस्मि न त्वद्भवने वसन्ती।।''[75]

एतैः उदाहरणैः स्पष्टं ज्ञायते वक्रोक्तिसम्प्रदायस्य रघुवंशमहाकाव्ये कीदृशम् उपस्थापनमासीदिति।

रघुवंशमहाकाव्ये औचित्यसम्प्रदायः –

'औचित्यमनुधावन्ति सर्वे रसगुणादयः' इति कथयन् आचार्यक्षेमेन्द्रेण यः औचित्यविचारः प्रतिपादितः सः यथावत् कालिदासेन रघुवंशमहाकाव्ये उपस्थापितः। अत एव काव्यमेतद् रमणीयतरमभवत् । औचित्यपूर्णवर्णनं उचितरसानुकूलाङ्कारप्रवेशः, औचित्यपूर्णशब्दरचना इत्येते अंशाः काव्यमिदम् अलंकुर्वन्ति ।यथा –

''उत्खात लोकत्रयकण्टकेऽपि सत्यप्रतिज्ञेऽप्यविकत्थनेऽपि ।
त्वां प्रत्यकस्मात्कलुषप्रवृत्तावस्त्येव मन्युर्भरताग्रजे मे ।।''76

अत्र वाल्मीकिरेव श्रीरामे मन्थुं कर्तुं क्षम इति ज्ञात्त्वैव औचित्यपूर्णं कथनमकारि कालिदासेन ।अपरत्रापि यथा –

''सा चूर्णगौरं रघुनन्दनस्य धात्रीकराभ्यां करभोपभोरूः ।
आसञ्जयामास यथाप्रदेशं कण्ठे गुण मूर्तमिवानुरागम् ।।''[77]

अत्र यथास्थानमासञ्जयागास किन्तु धात्र्या सुनन्दायाः कराभ्यां न तु स्वयमिति अनौचित्यनिराकरणं कृतम् । अपि च

'' स पाटलायां गवि तस्थिवांसं धनुर्धरः केसरिणं ददर्श ।
अधित्यकायामिव धातुमय्या लोघ्रद्रुमं सानुमतः प्रफुल्लम् ।।''78

अत्र अनुरूपामुपमां प्रदाय औचित्यनिर्वाहः कृतः । एवमौचित्यसम्प्रदायः रघुवंशे ।

उपसंहारः – रघुवंशमहाकाव्यं नाम महाकवेः कालिदासस्य अद्वितीया रचना । अत्र पूर्वोक्तप्रतिपादनैः स्पष्टमवगम्यते यत् महाकाव्यमिदं रचयिता कालिदासेन काव्यस्य सर्वेऽपि विषयाः, काव्यतत्त्वानि साङ्गोपाङ्गं विवेचितानि । अत एव रघुवंशमहाकाव्ये वयमलङ्कारशास्त्रस्य षण्णामपि सम्प्रदायाना–मुपस्थानमवलोकयितुं प्रभवामः । 'श्रुतेन यत्नेन च वागुपासिता, ध्रुवं करोत्येव कमप्यनुग्रहम्' इति वचनानुसारं कालिदासस्य प्रतिभा तं विशिष्टानुग्रहं प्रापय्य अमरकीर्तिं प्रायच्छत् । तद् दृष्टैव शास्त्रे सगौरवमुच्यते यत् 'कालिदासादय पञ्चशः एव कवयः महाकवयः इति ।'

''अस्पृष्टदोषा नलिनीव दृष्टा, हारावलीव ग्रथिता गुणौघैः ।
प्रियाङ्कपालीव विमर्दहृद्या न कालिदासादपरस्य वाणी ।।''

।। इति शम् ।।

अन्तष्टिप्पन्यः

1) प्र.रू. 1.5 ते 8
2) सा.पा. पृ. 42
3) ध्वन्या. 1.1
4) बसा. पा. पृ. 32
5) सा. पा. पृ. 54
6) सा. पा. पृ. 38
7) नाट्य. पृ. 202
8) औ. च. पृ. 32

9) का. मी. पृ. 212
10) ध्वन्या. 1.1
11) ध्वन्या. 1.13
12) कु. सं. 5.24
13) कु. सं. 6.84
14) रघु. 14.84
15) रघु. 5.64
16) रघु. 5.64 (सञ्जीवनी टीका)
17) रघु. 5.38
18) रघु. 13.23
19) रघु. 13.21
20) रघु. 6.29
21) रघु. 6.63
22) सा.पा. पृ. 33
23) रघु. 9.47
24) रघु. 13.35
25) रघु. 13.49
26) रघु. 8.46
27) रघु. 8.67
28) रघु. 3.26
29) रघु. 13.23
30) ध्वन्या. 1.5
31) रघु. 14.70
32) सा.पा. पृ. 49
33) विद्याधरः एकावल्याम्
34) विक्रमाङ्क. 1.7
35) रघु. 2.47
36) रघु. 2.27
37) रघु. 5.70
38) रघु. 7.23
39) रघु. 15.66
40) रघु. 11.47—48
41) का. मी. पृ. 218
42) रघु. 6.62
43) रघु. 2.20
44) रघु. 13.14
45) रघु. 13.47
46) रघु. 13.48
47) रघु. 13.60
48) रघु. 3.2
49) रघु. 8.93
50) रघु. 8.35
51) रघु. 2.2
52) रघु. 15.7
53) रघु. 12.58
54) रघु. 15.9
55) रघु. 8.7
56) रघु. 8.46

57) रघु. 8.51
58) रघु. 8.87
59) रघु. 8.30
60) रघु. 8.38
61) रघु. 9.1
62) रघु. 9.2
63) रघु. 9.3
64) रघु. 9.6
65) रघु. 9.8
66) रघु. 4.32
67) रघु. 2.15
68) रघु. 2.74
69) रघु. 7.16
70) रघु. 2.48
71) सा.पा.पृ. 40
72) वक्रो. पृ. 113
73) वक्रो. पृ. 1.18
74) वक्रो. पृ. 45
75) रघु. 14.63
76) रघु. 14.733
77) रघु. 6.83
78) रघु. 2.29

सन्दर्भग्रन्थाः

1) रघुवंशमहाकाव्यम् – मल्लिनाथटीका – चौखम्बा प्रकाशन
2) कालिदास मीमांसा – केशवशास्त्री मुसलगांवकर
3) वक्रोन्तिजीवितम् – आचार्यकुन्तकः
4) साहित्यपाथेयम् – प्रा. पराग जोशी
5) ध्वन्यालोकः – आनन्दवर्धनः

■ ■ ■

वेदेषु कौटुम्बिकजीवनवर्णनम्

डा. शिवरामभट्टः

"इष्टं प्राप्तुम् अनिष्टं दूरीकर्तुं यः अलौकिकम् उपायं वेदयति स वेदः" इति सायणाचार्यः कथयति । "सर्वज्ञानमयो हि सः" इति स्मृतिकाराः कथयन्ति । नारायणोपनिषदि अकार उकार मकार इति ओंकारात्मकः ऋग्यजुस्सामरूपः " स्त्रियामृक्सामयजुषी इति वेदास्त्रयस्त्रयी" इति अमरकोषानुसारं च त्रिविधात्मकः वेदः कालान्तरे स्वात्मानं विस्तारयन् अथर्वनामकं चतुर्थं प्रकारं प्रापत्। एवमेकैकोऽपि वेदः पतञ्जलेः व्याकरणमहाभाष्यानुसारम् एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, नवधा अथर्वणवेदः, एकविंशतिधा बाह्वृच्यम् इति विपुलशाखोपेतः महान् वटवृक्षः समजनि। ततः अतिगम्भीरतरस्य भगवतो वेदस्य अर्थम् अवगमयितुं मानुषशेमुष्यशक्तत्वात् शिक्षादीनि षडङ्गानि प्रावर्तिषत । यथा–

छन्दःपादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥[१] इति पाणिनीयशिक्षायां वेदस्य भिन्नभिन्नप्रकारैः अवगमनाय षडङ्गानि न्यरूपिषत । एवं प्रणवात्मकस्य वेदस्य अवगमनाय तच्छाखाः, षडङ्गानि, उपविद्याः, आर्षकाव्यादीनि, पुराणानि इत्यादीनि निरपद्यन्त ।

कालान्तरे प्रणवात्मकं वेदमवगन्तुमशक्ताः उपायमन्विष्यन्तः तन्निहितं गूढमर्थं ज्ञातुं प्रयतमानाः महर्षयः अकारे ऋग्वेदम्, उकारे यजुर्वेदम्, मकारे सामवेदं च अपश्यन् । तत्र विव्यास वेदान् इति व्यासः इति व्युत्पत्त्या व्यासः वेदानां विभजनमकरोत् इति कश्चन सम्प्रदायः श्रूयते । ततः अवशिष्टविषयान् एकत्रीकृत्य अङ्गिराः महर्षिः चतुर्थं वेदम् अथर्वनामानम् अपश्यत् इत्यपि सम्प्रदायसिद्धः । तत्र प्राचीनः प्रथमः ऋग्वेदः प्रार्थनारूपः छन्दोनिबद्धः देवतानां स्तुतिरूपः वर्तते । द्वितीयः यजुर्वेदः गद्यात्मकः

यज्ञविधानबोधकः अस्ति । तृतीयः सामवेदः देवतानां स्तुतिरूपः गानात्मकः वर्तते । चतुर्थः अथर्ववेदः मारणमोहनोच्चाटनादीनाम् आभिचारिककर्मणाम् आयुर्वेदशकुनपशुविद्यादीनां च बोधकः वर्तते । चतुर्णां वेदानां चत्वारः अधिकारिणः सन्ति । यथा - ऋग्वेदस्य अधिकारी होता, यजुर्वदस्य अधिकारी अध्वर्युः, सामवेदस्य अधिकारी उद्गाता, अथर्ववेदस्य अधिकारी ब्रह्मा इति । “वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयताम्” इति शंकरभगवत्पादानां वचनेन वेदः नित्यमध्येतव्यः, तदुदितं कर्म अपि अनुष्ठेयम् इति मानवजीवनस्य सर्वं साध्यं साधितं भवति।

वेदः न केवलम् अध्यात्मज्ञानस्य आगारः । वेदः न केवलं भौतिकपदार्थानां परिचायकः । वेदः न केवलं यज्ञादिकर्मकाण्डप्रतिपादकः । अपि तु वेदः राष्ट्रियसामाजिकपारिवारिकव्यवस्थानामपि व्यवस्थापकः वरीवर्ति । वेदः कौटुम्बिकजीवनस्य पथप्रदर्शकः वर्तते । मनुष्यः एकः सामाजिकः प्राणी वर्तते । अतः सः कस्मिन् अपि आश्रमे भवतु नाम कुटुम्बेन सह सम्बद्धो बोभवत्येव । अतः यः अस्मान् आवृणोति सम्बध्नाति सः परिवारः भवति । स्त्रीपुरुषयोः सम्बन्धात् परिवारशृङ्खला निर्मिता भवति । तत्र मुख्याः भवन्ति – पतिः, पत्नी, माता, पिता, पुत्रः, पुत्री, भ्राता, भगिनी, अग्रजानुजौ, अग्रजानुजे, ननान्दा, देवरः, स्नुषा, प्रजावती, मातुलः, मातुलानी, श्वशुरः, श्वश्रूः इत्यादयः । एतेषां परस्परसम्बन्धः कौटुम्बिकव्यवस्थायां निर्दिष्टः वर्तते । पतिः पत्नी च सन्तानस्य मातरपितरौ कौटुम्बिकजीवने मूर्धन्यस्थानं भजतः । ततः स्थायिसम्बन्धदृष्ट्या द्वितीयस्थानं पुत्रस्य भवति पितृभ्यां सह निरन्तरवासात् तद्वंशानुवर्तनाच्च । कन्या विवाहव्यवस्थाधीनत्वात् काले परगृहसम्पत्तेः कारणात् उभयकुलसंयोजिनी समाजे कौटुम्बिकबन्धने च महत्त्वं स्थानमावहति । एवं स्त्रीपुरुषयोः संयोगात् पारिवारिकशृङ्खला आरब्धा विवृद्धा च भवति ।

कौटुम्बिकजीवनम् –

वेदेषु बहुत्र कौटुम्बिकजीवनं प्रतिपादितमस्ति । परिवारे सदस्यानां कः परस्परं सम्बन्धः? तेषां दायित्वं किम्? सामञ्जस्यं कथं निर्वहणीयम् ? इति तत्र तत्र विशदतया प्रतिपादितमस्ति ।

पुत्रादीनां पारस्परिकसम्बन्ध: -

अथर्ववेदे पुत्रादीनां पारस्परिकसम्बन्ध: परिवारे इत्थं भवेदिति वर्णितोऽस्ति । यथा –

अनुव्रत: पितु: पुत्रो मात्रा भवतु सम्मना: ।

जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम् ॥[२] इति अर्थात् यदि पुत्र: पितु: अनुव्रत: स्यात् तर्हि कलह: कुत:? यदि मात्रा समाना विचारधारा स्यात् नारीकुलस्य तिरस्कार: कुत:? पत्या सह पत्नी मधुरवाण्या वदेत् तर्हि अशान्ति: कुत:? इति परस्परं सहजीवितुं सामञ्जस्यं च स्थायि सम्पादयितुं मार्ग: प्रादर्शि । एवमेव भ्रातृणां परस्परसामञ्जस्याय अपरा श्रुति: इत्थं कथयति । यथा –

मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुत स्वसा । सम्यञ्च: सव्रता भूत्वा वाचं वदत भद्रया ॥[३] इति भ्रातर: भगिन्यश्च परस्परं द्वेषं मा कुरुत । समानमार्गम् अनुसरन्त: समाननियमं पालयन्त: भद्रवाण्या: प्रयोगं कुरुत इति अनया श्रुत्या भ्रातृभगिनीनां परस्परं सहजिवनं बोधितम् ।

साम्प्रतिककाले तन्त्रज्ञानस्य वेगेन उद्योगैकतत्परतया जनानां पारिवारिकजीवनस्य मर्यादा महत्त्वं दायित्वं कर्तव्यं च विस्मृतप्रायं बहूनामज्ञातप्रायं च वर्तते । तेन परिवारे ज्येष्ठानाम् आदर: न्यून: संजात: । तथा च तेभ्य: जीवनानुभवमार्गदर्शनं प्राप्तुं न शक्यते । परं वेदेषु पारिवारिकजीवनाय पञ्चानां महायज्ञानां व्यवस्था कृता । तत्र पितृयज्ञोऽपि अन्यतम: । ज्येष्ठानाम्, विदुषाम्, गुरुजनानाम्, बन्धूनाम्, अतिथीनां सत्कार: सेवा च गृहस्थस्य अपरिहार्यम् अनुवार्यं च पवित्रं कर्म कथितमस्ति । यथा –

अत्र पितरो मादयध्वं यथाभागमावृषायध्वम् । अमीमदन्त पितरो यथा भागमावृषायिषत ॥[४] इति पितृणां सेवया आदरेण परिवारे मनुष्य: सर्वविधं सौख्यं प्राप्तुं शक्नोति इति भाव: ।

श्वशुरगृहे स्त्रिया: साधिकारं जीवनम् -

स्त्रिया: श्वशुरगृहे सम्मानपूर्वकपारिवारजीवनयापनस्य मार्ग: प्रदर्श्यते ऋग्वेदे अथर्ववेदे च । यथा –

सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव । ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि

देवृषु ॥[५] इति

सम्राज्ञ्येधि श्वशुरेषु सम्राज्ञ्युत देवृषु । ननान्दुः सम्राज्ञ्येधि सम्राज्ञ्युत श्वश्र्वाः ॥[६] इति मन्त्रैः स्त्रीणां गृहस्थाश्रमे श्वशुरगृहे सर्वश्रेष्ठं सम्मानपूर्वकं जीवनं प्रादर्शि । यथा राज्ञी प्रासादे आनन्देन वसति जीवति तथैव भवती अपि श्वशुरेण श्वश्र्वा ननान्द्रा देवरेण च सह साधिकारं सम्राज्ञी निवसतु इति स्त्रियाः दासीभावः सुतरां तिरस्कृतः ।

निष्कपटः व्यवहारः -

अथर्ववेदे स्त्रीपुरुषयोः परिवारे परस्परं निष्कपटः व्यवहारः भवेदिति वर्णितम् । यथा – यदन्तरं तद्बाह्यम् । यद्बाह्यं तदन्तरम्[७] इति अन्तः बाह्यं च व्यवहारः सर्वेषां समानः स्यात् इति आशयः । यजुर्वेदे आरण्यकेऽपि "यद्वाचा वदति तत्कर्मणा करोति" इति वाक्कर्मणोः पारदर्शकत्वम् एककार्यत्वं च अवाचि ।

दम्पत्योः प्रेमभावः -

दम्पत्योः परस्परं प्रेमभावः स्यात् । परस्परं कामयेयाताम् । तयोः परस्परं विरोधः न स्यात् इति विषये अथर्ववेदे उच्यते । यथा –

यथा वृक्षं लिबुजा समन्तं परिषस्वजे । एवा परिष्वजस्व मां यथा मां कामिनी असः यथा मन्नापगा असः[८] इति । अन्तः कृणुष्व मां हृदि मन इन्नौ सहासति[९] इति ।

विवाहसन्दर्भे अपि वरं अग्निं साक्षीकृत्य उत्थितायाः वध्वाः दक्षिणेंसे स्वदक्षिणबाहुं निधाय आश्लिष्यन् इव दक्षिणेन हस्तेन तस्याः हृदयमभिमृशति । यथा – मम हृदये हृदयं ते अस्तु । मम चित्ते चित्तमस्तु ते । मम वाचमेकमनाः श्रृणु मामेवानुव्रता । सहचार्या मया भव इति ।

सहधर्मः -

बोधायनगृह्यसूत्रे कन्यादाता वरस्य कृते वदति यत् "धर्मे च अर्थे च कामे च नातिचरितव्या त्वयेयम् । सहधर्मश्चर्यताम् । चरिष्यामि" इति वरः प्रतिश्रृणोति इति ।

दम्पत्योः सख्यम् –

सखायः सख्यपदा अभूम । सख्यं ते गमेयम् । सख्यात्ते मा योषम् । सख्यान्मे मायोष्ठाः । इति दम्पत्योः परस्परं मित्रभावः प्रत्यपादि ।

वीरसन्तानोत्पत्तिकामना –

यशोदायकस्य वीरवत्तमस्य सन्तानस्य कामना क्रियते दम्पतीभ्यां वेदे । यथा – जिष्णू रथेष्ठा सभेयो युवास्य यजमानस्य वीरो जायताम्[१०] इति विजयशीलः रथे उपवेशनशीलः, सभायां सम्मानं प्राप्तुं योग्यः, तरुणः पुत्रः यजमानस्य भवतु इति कामना अकारि ।

पितृदायित्वम् –

स नः पितेव सूनवेऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये ॥[११] इति अग्निदेवमुद्दिश्य पितुः उपमानं दीयते । यथा पुत्रस्य संकष्टे पिता सत्वरम् उपस्थितो भवति तथैव हे अग्निदेव! त्वमपि अस्माकं कल्याणाय सत्वरं सन्निहितो भव इति काले सन्तानस्य कष्टनिवारणं पितुः दायित्वमुक्तम् ।

अतिथिसत्कारः -

पूर्णं नारि प्र भार कुम्भमेतं घृतस्य धाराममृतेन संभृताम् ।

इमां पात्रीममृतेना समङ्ग्धि इष्टापूर्तिमभि रक्षात्येनाम् ॥[१२] इति पतिः पत्नीं वदति यत् अतिथीनां कृते

परिवेषणार्थं घृतस्य घटमानय । अतिथिभ्यः यावदावश्यकं तावत् देहि । संकोचं मा कुरु । एवं दानकरणेन गृहस्य शोभा वर्धते । अतिथीनां सत्कारेण परिवारस्य इच्छापूर्तिः भवति गृहं च सुरक्षितं भवति इति आशयः ।

अनृणत्वम् –

परिवारजनाः ऋणं न कुर्युः इत्याशयकं सन्देशं वदति अथर्ववेदः । यथा –

अनृणा अस्मिन् अनृणाः परस्मिन् तृतीये लोके अनृणाः स्याम ।

ये देवयानाः पितृयाणाश्च लोकाः सर्वान् पथो अनृणा आ क्षियेम ॥[१३] इति अस्मिन् लोके ऋणरहिताः स्याम । परलोके ऋणरहिताः स्याम । तृतीयलोके अपि

ऋणरहिता: स्याम । देवयानपितृयानमार्गे अपि ऋणरहिता: स्याम इत्येवं प्रत्येकं गृहस्थोऽपि अनृणो भवतु इति आशय: । ऋणे कृते बहव: आपत्तय: आपतन्ति । दुष्टस्वप्ना: दु:खमयजीवनं हिंसकोपद्रवा: विकासे बाधा: निर्धनता अपशब्दोच्चारणस्वभाव: च इत्यादीनां दु:खविशेषाणाम् आवृत्ति: जीवने भवति इति सुतराम् ऋणं न कर्तव्यम् इति बोधयति ।

उपसंहार: -

एवं विभिन्नप्रकारै: कौटुम्बिकजीवने परिवारसदस्यानां परस्परसम्बन्ध: दायित्वं च वेदेषु स्पष्टतया निर्दिष्ट: वर्तते । साम्प्रतिककाले परिवारे सामञ्जस्यस्थापनाय परिवारव्यवस्थाया: सुरक्षितानुवर्तनाय एतेषां मन्त्रोपदेशानां काले काले महती आवश्यकता वर्तते । अन्यथा भारतीया या सुखमयी सनातनपारिवारिकव्यवस्था सम्पूर्णतया नाशं गच्छेत् । समाजे अव्यवस्था जागृयात् । तेन समाजस्य कौटुम्बिकजीवनस्य च विघटनं स्यात् । एतादृशानां वेदोक्तानाम् उपदेशानां साम्प्रतिककौटुम्बिकजीवने आचरणाभावात् परिवारे परस्परं जनानां विश्वास: नास्ति । परस्परम् आत्मनियन्त्रणं नास्ति । एकसंगतित्वभावना नास्ति । अन्योन्याविज्ञातस्य व्यवहारस्य वृद्धि: जाता । केवलं भौतिकसुखावाप्तये एव पारिवारिकव्यवस्थाया: भावना समुत्पन्ना । अत: अस्माकं भारतीया वेदोक्तकौटुम्बिकव्यवस्था यथोचितं पुनरुत्थित: स्यात् । तेन कौटुम्बिकव्यवस्था सुदृढा भवति । जना: परस्परम् आनन्देन जीवितुं शक्नुवन्ति । तदा एव धन्यो गृहस्थाश्रम: इति संकल्पना सार्थिका भवति इति वेदेषु पारिवारिकजीवनदर्शनं सुव्यस्थितं सुदृढं च न्यरूपीति प्रतिपाद्य विरम्यते ।

सन्दर्भटिप्पण्य: –

१. पाणिनीयशिक्षा – श्लोकसंख्या – ४१,४२

२. अथर्ववेद: -०३.३०.०१

३. तत्रैव – ०३.३०.०३

४. यजुर्वेद: - ०२.३१

५. ऋग्वेद: - १०.८५.४६

६. अथर्ववेदः - १४.०१.४४

७. तत्रैव – ०२.३०.०४

८. तत्रैव – ०६.०८.०१

९. तत्रैव – ०७.३६.०१

१०. यजुर्वेदः - २२.२२

११. ऋग्वेदः - ०१.०१.०९

१२. अथर्ववेदः - ०३.१२.०८

१३. तत्रैव - ०६.११७.०३

परिशीलितग्रन्थाः -

०१. ऋग्वेदसंहिता – सम्पादनम्, अमलधारिसिंहगौतमः, महर्षिसान्दीपनीवेदविद्याप्रतिष्ठानम्, उज्जयिनी

०२. मूलयजुर्वेदसंहिता – संकलयिता, महर्षिदैवरातः, काशीहिन्दूविश्वविद्यालयः, वाराणसी

०३. सामवेदः - दक्षिणम्नायश्रीशारदापीठम्, शृङ्गेरि

०४. अथर्ववेदसंहिता – सम्पादकः, श्रीरामशर्मा आचार्यः, युगनिर्माणयोजना, मथुरा

०५. वैदिकनिबन्धमाला – डा. धर्मेन्द्र शास्त्री, विद्यानिधिप्रकाशनम्, देहली

■ ■ ■

अपर्णकजातकस्यानुपलब्धिविचारः

बर्ट्रम् ग्रेगरि लियनगे

॥ अपर्णकजातकस्यानुपलब्धिविचारः ॥

कारिकाः

अर्वाक्रिसत्यभावस्य बद्धभावोऽपि तर्कवत् ।
योगं कुत्र चतुर्थस्य श्रुतिमात्रे गतिं विना ॥ ०१ ॥

कदापि न प्रवृत्त्यङ्गं श्रुतिमात्राद्भविष्यति ।
योगं तदनुमानत्वादन्धवेणुं परास्यतु ॥ ०२ ॥

अदृष्टफलविनिर्देशं सानुषङ्गैः प्रतीयते ।
अविनाभावसम्बन्धाद्यथापर्णकजातके ॥ ०३ ॥

अस्तित्वकल्पितत्वेन कार्यकारणकल्पना ।
तेषामविद्यमानत्वे साध्यधर्मनिषेधनम् ॥ ०४ ॥

उपलब्धानमस्तित्वं यावत्प्रत्यक्षगोचरे।
तत्रैवानुपलम्भानां नास्तित्वमत्र गम्यते ॥ ०५ ॥

सद्भूतार्थस्य नास्तित्वं विभ्रमं श्रुतिज्ञानतः ।
अस्तित्वबुद्धिहानत्वमविनाभावयोजितम् ॥ ०६ ॥

कार्यस्वभावसम्बन्धात्सर्वत्रानुपलम्भनम् ।
जातके बोधिसत्त्वेन सुष्फुटं तस्य शास्त्रवत् ॥ ०७ ॥

तट्टीका

अत्र चोद्यते चतुरार्यसत्यमधिकृत्य

अर्वाक्त्रिसत्यभावस्य बद्धभावोऽपि तर्कवत् ।

योगं कुत्र चतुर्थस्य श्रुतिमात्रे गतिं विना ॥०१॥

त्रिसत्यभावस्य दुःखसमुदयनिरोधानामर्वाक्त्रिसत्यानां तर्कवत्तर्कशास्त्रानुगतप्रत्यक्षानुमानद्वयसिद्धि-सम्बन्धत्वात्बद्धभावस्यान्योन्ययुक्तरूपत्वं प्रसिद्धमपि चतुर्थस्य मार्गसत्यस्य कुत्र योगमिच्छति श्रुतिमात्रे गतिं भगवतो धर्मं प्रति जनितश्रद्धानुगमनं विना। किं तर्कवत्। दुःखे लोकः प्रतिष्ठित इति कायचित्तपीडनार्थात्संस्कार-नित्यसुखप्रपञ्चीकरणार्थाद्वा दुःखस्य प्रत्यक्षमात्रसिद्धियुक्तम्। तथा तत्समुदयद्वारेण प्रपञ्चसंज्ञाभूततृष्णा। अनयोः बिम्बप्रतिबिम्बभाववद्व बीजाङ्कुरभाववत्। यथा बिम्बावरणे प्रतिबिम्बव्यापत्तिसदृशेन् तृष्णाक्षये दुःखनिरोध इति तस्यानुमानसिद्धिः। अपि तु तृष्णाक्षयाख्यमार्गप्रतिपन्नानां का बुद्धिर्मार्गपर्यन्ते मोक्षाधिगमस्य तत्त्वमिति। न हि प्रत्यक्षज्ञानं नास्त्यनुमानं वा। तस्माच्छ्रुतिमात्रे गतिम्। उक्तं नु श्रद्धाजात उपसंक्रमति भगवता। उक्तं नु शङ्कराचार्येनापि प्रसिद्धित एव प्रवृत्तिनिवृत्त्युपपत्तेरिति ॥०१॥

न ह्येवं। उच्यते।

कदापि न प्रवृत्त्यङ्गं श्रुतिमात्राद्भविष्यति।

योगं तदनुमानत्वादन्धवेणुं परास्यतु ॥०२॥

कदापि यस्य पुरुषार्थोत्प्रेक्षणप्रेक्षावतो मार्गपर्यन्तफलार्थिशीलस्य प्रवृत्त्यङ्गं गमनकामं मार्गवर्णितश्रुतिमात्रात् न भविष्यति संशयात्। उक्तं हि भगवता शास्त्रागमाप्तवाक्यप्रमाणस्य द्विधा विपाका सत्यञ्चान्यथा। तस्य चतुर्थस्य मार्गसत्यस्य चतुरार्यसत्यप्रसङ्गे योगं खल्वनुमानत्वादनुमानेनैव साधयितव्यम्। भगवतापि मूलाधारविरहिताममौलिकश्रद्धां त्यक्तवा सकारणविचारपूर्वकाकारवच्छ्रद्धामुपदर्शितम्। उक्तं हि धर्मकीर्तिपादेनार्थानर्थविवेचनस्यानुमानाश्रयत्वादिति।

तस्मादादिमध्यान्तावलोकनाक्षमान्धवेणुसदृशभ्रमं परास्यतु। अविसंवादज्ञानेन फलोत्पादनमार्ग एव निस्संशयं गच्छतु॥ ०२॥

ननु फलोदयज्ञानं मार्गपर्यन्ते प्रतिपद्यते। गृहान्तर्वृतमुडुम्बरवासिना कथं कथ्यते। अत उच्यते।

अदृष्टफलविनिर्देशं सानुषङ्गैः प्रतीयते ।

अविनाभावसम्बन्धाद्यथापर्णकजातके ॥ ०३॥

मार्गपर्यन्तफल अदृष्टे तस्यास्तित्वं नास्तित्वं वा विनिर्देशमध्यवसायं तस्य कार्यकारणस्वभावानुषङ्गसहितत्वात् सानुषङ्गैः प्रतीयत एव। कस्मात्। तेषामविनाभावसम्बन्धात्। यथापर्णकजातक इति किम्।

अपर्णकजातकस्य सार्थवाहनबोधिसत्त्वेनादृष्टे जले यक्षस्य वार्तां मिथ्यां मृषामिति स्वार्थानुमानेन ज्ञात्वा परार्थानुमानेन स्वकीयाञ्ज्ञापयित्वा जलक्षेपणापथ्यार्थं निश्चित्य विना मार्गपर्यन्तदर्शनं मार्गप्रवेशं कृतम्। तदा स्वकीयानभिप्रेष्या-स्मिन्कान्तारे सरो पुष्करणी वास्तीति श्रुतपूर्वं वेति तेन बोधिसत्त्वेन प्रथममाप्तवाक्यं विचारितम्। बहुश्रुतमात्रेण किञ्चिन्न सत्यं भवति। एकश्रुतमात्रेण नानृतम्। इतोऽपि किञ्चित्साध्यधर्मं बहुपुद्गलभाषणशास्त्रागमवार्तायां समावदृश्यते चेत् प्रेक्षावंस्तत्परीक्षाकारी भवति। स पुनर्यक्षस्य वचनाद्वृष्टिभावाभावपरीक्षयन् पृच्छति वृष्टिवातसमीरणस्य दूरं मेघशीर्षस्य दर्शनं विद्युल्लताया अवभासं मेघशब्दस्य श्रवणञ्च यत एतानि वृष्ट्याः कार्यकारणरूपाणि। अदृश्यमानवस्तुविषयेऽ-नुपलब्धिज्ञानं प्रमाणम् ॥ ०३॥

नन्वविद्यमानवस्तुविषय एवानुपलब्धिप्रमाणं युक्तम्। यद्यदृश्यमानवस्तुनोऽपि सांव्यवहारिकत्वेन सत्भावं चेत् कथम-नुपलब्धिप्रमाणेन तस्य निश्चितमिष्टम्। युक्तमेतद्। तेनाह

अस्तित्वकल्पितत्वेन कार्यकारणकल्पना ।

तेषामविद्यमानत्वे साध्यधर्मनिषेधनम् ॥ ०४॥

वृष्टिसत्त्वपरीक्षायां बोधिसत्त्वेन वृष्ट्यस्तित्वं प्रागेवकल्पितम्। यावता वृष्ट्या

विद्यमानत्वमनुपलम्भनं तावता तस्याः कार्यकारणरूपवद्वृष्टिवातमेघशीर्षादीनां परीक्षणं सप्रयोजनम्। ततस्तदस्तित्वस्य कल्पितत्वेन तत्कार्यकारणकल्पना। तेषां वृष्टिवातादीनामविद्यमानत्वे सति वृष्टिरस्तीति पक्षधर्मस्य निरस्तम्। यदि वस्तुतो वृष्ट्यस्तित्वं चेत्तेषां वृष्टिवातादीनां स्वभावसम्बन्धाद्वा कार्यसम्बन्धाद्वा व्यवसायमूहतेऽविनाभावनियमात्। तदप्यनुमानम्। तस्माद्विद्यमानाविद्यमानमार्गफलं मार्गावतीर्णस्य पूर्वमनुमानप्रमाणेन ज्ञातुं समर्थम्। तत्सम्यग्ज्ञानेनैव हेयोपादानमिति कृत्वा न केवलं श्रुतिमात्रेण प्रवृत्तिनि-वृत्त्यङ्गम्। यथापर्णकजातके बोधिसत्त्वेन यक्षवार्ताश्रवणमात्रेण न जलक्षेपणं कृत्वा वृष्ट्यभावनिश्चितमनसा मार्गं प्रविश्टम् ॥०४॥

ननु कस्मिंश्चित्प्रदेशविशेष उपलब्धिलक्षणप्राप्तस्यानुपलब्धिश्शास्त्रे। तत्र दूरप्रदेशविशेषे वृष्टिर्नास्तीत्यभव्यानुपलब्धि-र्देशकालस्वभावविप्रकृष्टानां देशविप्रकृष्टत्वात्। तन्न युक्तम्। उच्यते।

उपलब्धानमस्तित्वं यावत्प्रत्यक्षगोचरे।

तत्रैवानुपलम्भानां नास्तित्वमत्र गम्यते ॥०५॥

अत्रानुपलब्धिप्रसङ्गे प्रत्यक्षज्ञानस्य गोचरे व्याप्तप्रदेशविशेषे कस्यचिद्वस्तुन अस्तित्वं चेत् तस्योपलब्धिभावेन भूतार्थोऽ-यमिति व्यवस्था प्रत्यक्षगोचर उपलब्धानामस्तित्वात्। प्रत्यक्षप्रभेदकानामिन्द्रियज्ञानमादिं गृह्णाति तद्भिनेतरज्ञानानाम-सम्भवात्। योगिज्ञानमप्यिन्द्रियज्ञानपूर्वकम्। इन्द्रियज्ञानेन प्रमितभूतार्थस्य भावनाप्रकर्षपर्यन्ते तत्सम्भवात्। चक्षुरा-दिपञ्चेन्द्रियविषय इन्द्रियज्ञानम्। न केवलं चक्षुरापतनपथाद्विप्रकृष्टाददतीन्द्रियं परोक्षं वा युक्तमन्येन्द्रियगोचरसामर्थ्यात्। कदाचिद्दूरत्वादि बाधकहेतुना वस्तुनः कृते चक्षुर्विज्ञानं नोद्भवति। ततः तदनुमानाश्रयत्वम्। न तत्र दूरत्वं स्वर्गपाता-लवद्वस्तुनः कार्यकारणानुषङ्गानामिन्द्रियगोचरत्वात्। तेषामभूतत्वे वस्तु नास्तीत्यनुपलब्धिर्गम्यते ॥०५॥

नन्वत्रानुपलब्धिज्ञानेन वृष्ट्यभूतमात्रमेव सुष्फुटम्। जलशून्यो वृष्टिविगमप्रदेश इति बुद्धिः तस्य कथं प्राप्तम्। मेघवर्षा-वियुक्तकाले ग्रीष्मे कस्यचित्प्रदेशस्य जलं सम्भवति नु। ततो वृष्ट्यनुपलब्धिज्ञानेन विजलप्रदेशोऽयमिति मत्वा न कृत्वा जल-क्षेपणमयोग्यं कृतं महासत्त्वेन।

नह्येवम्। न वृष्टिविगमप्रदेशेजलशून्यमित्यस्माकमप्यिष्टम्। तेनोच्यते।

सद्भूतार्थस्य नास्तित्वं विभ्रमं श्रुतिज्ञानतः ।

अस्तित्वबुद्धिहानत्वमविनाभावयोजितम् ॥०६॥

कस्मिंश्चिदधिष्ठाने जलमस्ति चेत्तत्र वृष्ट्यनुपलब्धेः सद्भूतार्थस्य जलस्य नास्तित्वमूहत इति विभ्रममविनाभावनियम-विरुद्धत्वात्। यत्र यत्र जलमस्ति तत्र तत्र वृष्टिरस्ति वा यत्र यत्र जलं नास्ति तत्र तत्र वृष्टिर्नास्ति वान्वयव्यतिरेकवशान्न तत्र नियमम्। न जातके महासत्वेन बोधिसत्त्वेन जलशून्योऽयं प्रदेश इति ज्ञानेन प्रवृत्तम्। अपि तु वृष्टिविगमकाले ग्रीष्मे च जलस्य न्यूनीभावो लोकप्रसिद्धः। अनिराकृते प्रतीतिप्रत्यक्षे च। अपि च साक्षात्प्रकटीभूतवस्तुनोऽस्तित्वं नास्तित्वं वा नानुमानस्यविषयम्। केवलमदृश्यमानमात्रेण यस्य नास्तित्वमाभासत्वे तस्यास्तित्वबुद्धिः श्रुतिज्ञानतः सम्भवति चेत्तद्हानार्थेऽविनाभावयोग्यानुपलब्धिः॥०६॥

अतो बोधिसत्त्वस्यानुपलब्धिप्रयोगस्य शास्त्रविरुद्धत्वं नास्तीत्याह।

कार्यस्वभावसम्बन्धात्सर्वत्रानुपलम्भनम् ।

जातके बोधिसत्त्वेन सुष्फुटं तस्य शास्त्रवत् ॥०७॥

तादात्म्यतदुत्पत्तीति द्वौ सम्बन्धा अनुमानाश्रितौ स्वभावकार्यरूपयोः। प्रयोजनवशात्ते वस्तुसत्भावसिद्धेः। तयोरेवा-नुपलब्धिज्ञानं वस्तुप्रतिषेधप्रयोजने। तस्मात्सर्वत्रानुपलम्भनमपि कार्यकारणसम्बन्धाद्गम्यते। अस्मिञ्जातके बोधिसत्त्व-महासत्त्वेन यथा शास्त्रोद्दिष्टे तथा तच्छास्त्रवत्तस्यानुपलब्धिज्ञानस्य सुष्फुटं कृतम्। तद्यथा।

जलबिन्दुसंकीर्णशीतस्पर्शजनकवातो वृष्टिवातः। वर्षाकाले वृष्टिपतन एकयोजनमात्रं वृष्टिवातस्पर्शः। तस्यास्पर्शलिङ्गेन यावत्पुरत एकयोजनमात्रं तावद्वृष्ट्या असम्भवः। कार्यानुपलब्धिः।

नभश्शीर्षे व्याप्तमेघान्धकारछाया मेघशीर्शम्। तेषां दर्शनमेकयोजनमात्रे। मेघकारणे सति वृष्टकार्यमिति कृत्वा तेषामदृश्यमाने कारणानुपलब्धिः।

तथाऽपि विद्युल्लता चतुर्पञ्चयोजनमात्रं प्रकाश्यते। मेघशब्द् एकद्वियोजनमात्रम्। एतयोः केवलं दृष्टान्तभेदः। न प्रयोगभेदः। एतत्प्रयोगं षोडशप्रयोगमध्येऽपि न संगृहीतम्। अनुपलब्धिप्रयोगानां

गणना न कुत्रापि संरुद्धा। तस्मादुक्तं कार्यस्वभावसम्बन्धादनुपलब्धिज्ञानमिति संक्षेपतः। एतस्मिं प्रसङ्गे विद्युल्लता मेघशब्दश्च मेघानां कार्यभूतौ वृष्टिसदृशश्च। यथाग्नेर्दूमतापौ। यत्र दूमाभावो तत्र तापाभावश्च वह्निरभावात्। ततः कारणान्यकार्यानुपलब्धिः सप्तदशप्रयोगः।

तस्माच्छ्रुतिमात्रेण विचारवियुक्तज्ञानेन प्रेक्षावतः प्रवृत्तिनिवृत्त्यङ्गं न कदापि कुत्रापि युक्तम्। अदृष्टे फलेऽनुमानाश्रयेन वा निर्दिष्टफलार्थी भवतु यथापर्णकजातके।
॥ इत्यपर्णकजातकस्यानुपलब्धिविचारो नाम बर्ट्रम् ग्रेगरि लियनगेयस्य चर्चा ॥

References

(S.I.p.40)
(A.III.p.294)
(Dhp. verse. 354)
(M.I.p.479)
See BGS XIII.2 and also II.21
(M.II.p.170)
(M.II.p.170)
(M.I.p.320 and M.I.p.401)
(PVSV. Before verse 1)
(M.II.p.170)
(J. pp.102-103)
(NB. II.12)
(VP. XVI)
(TB. pp. 81-85)

Abbreviations

A - The Aṅguttara-nikāya. Part III, ed., E. Hardy. London: Pali Text Society, 1976.

BGS - Śrīmad Bhagavad Gītā with Śaṅkarabhāśya. Delhi:

Motilal Banarsidas, 2011.

Dhp - Dhammapada. eds., O. von Hinüber and K.R. Norman. Oxford: Pali Text Society, 1995.

J - The Jātaka together with its Commentary. Vol.I, ed., V. Fausbøll. London: Pali Text Society, 1962.

M - The Majjhima-nikāya. Vol.I, ed., V. Trenckner. London: Pali Text Society, 1979.
- The Majjhima-nikāya. Vol.II, ed., Robert Chalmers. London: Pali Text Society, 1977.

NB - (Nyāyabindu), Pandita Durveka Miśra's Dharmottarapradīpa: Being a Sub-commentary on Dharmottara's Nyāyabinduṭīkā, a Commentary on Dharmakīrti's Nyāyabindu. ed., Pandita Dulsukhbhai Malvania. Patna: Kashi Prasad Jayaswal Research Institute, 1971.

PVSV - The Pramāṇavārttikam of Dharmakīrti: The First Chapter with the Autocommentary. ed., Raniero Gnoli. Roma: Istituto Italiano Peril Medio Ed Estremo Oriente, 1960.

S - The Saṃyutta-nikāya of the Sutta-piṭaka. Part. I, ed., M. Léon Feer. Oxford: Pali Text Soceity, 1991.

TB - (Tarkabhāṣā), An Introduction to Buddhist Philosophy: An Annotated Translation of Tarkabhāṣā of Mokṣākaragupta. Yuichi Kajiyama. Vienna: 1998.

VP - Vaidalyaprakaraṇa. eds., Fernando Tola and Carmen Dragonetti. Delhi: Motilal Banarsidas, 2004.

■ ■ ■

श्रीमद्भागवतपुराणे ज्योतिःशास्त्रविषयाः

डॉ. एस. उमापतिः

सुविदितमेवेदं यदिदं भागवतपुराणरत्नं श्रीमता वेदव्यासमुनिना विरचितमिति । अत्र हि समस्तशास्त्राणां तत्वं निगदितं दृश्यते । तत्र यत् प्रत्यक्षशास्त्रमिति, त्रय्याः नेत्रस्थानीयमिति, सर्वशास्त्रोपकारकमिति , वेदाङ्गान्यतममिति च प्राप्तप्रथं भवति यच्च होरा, संहिता, सिद्धान्तरूपेण त्रिधाभूतं धर्माचरणार्थमपेक्षितस्य कालस्यावगमने महदुपकरोति, फलञ्च भणति इष्टस्य, परिहारञ्च प्रवदति अनिष्टस्य, तस्य ज्योतिश्शास्त्रस्याप्यादरो दरीदृश्यते। परमहंससंहिताभूते श्रीमद्भागवतपुराणे आप्रथमस्कन्धं द्वादशस्कन्धपर्यन्तं शास्त्रस्यास्य विषयाः व्याप्ता दृश्यन्ते , विशेषतश्च पञ्चमस्कन्धे ।

१) होराविषयाः -

श्रीमद्भागवतप्रथमस्कन्धे द्वादशाध्याये परीक्षिन्महाराजस्य जातकं दैवज्ञैर्गण्यते । तदनुसारं फलान्यपि प्रोच्यन्ते तैः। तत्राप्ययं विशेषः परीक्षितो मरणमपि कथं संभवीति कथ्यते इत्थम् -

"तक्षकादात्मनो मृत्युं द्विजपुत्रोपसर्जितात् । प्रपत्स्यत उपश्रुत्य मुक्तसङ्गः पदं हरेः ॥

इति राज्ञ उपादिश्य विप्राः जातककोविदाः" ॥ [भा I: 13:27,29]

किञ्च जीवोत्पत्तिरपि होराशास्त्रे बृहज्जातक, बृहत्पाराशरादिग्रन्थेषु वर्णिता भवति । स च विषयः भागवते स्पष्टतया प्रोक्तमित्थम् -

"कललं त्वेकरात्रेण पञ्चरात्रेण बुद्बुदम् । दशाहेन तु कर्कन्धूः

पेश्यण्डं वा ततः परम् ॥

मासेन तु शिरो, द्वाभ्यां बाह्वङ्घ्र्याद्यङ्गविग्रहः । नखलोमास्थिचर्माणि लिङ्गच्छिद्रोद्भवस्त्रिभिः ॥

चतुर्भिर्धातवः सप्त, पञ्चभिः क्षुत्तृडुद्भवः । षड्भिर्जरायुणा वीतः कुक्षौ भ्राम्यति दक्षिणे ॥

आरभ्य सप्तमान्मासाल्लब्धबोधोऽपि वेपितः"॥
[भा:III:31: 2,3,4,10]

एवमेव बृहज्जातके निषेकाध्यायान्ते - 'उदयति मृदुभांशे सप्तमस्थे च मन्दे यदि भवति निषेकः सूतिरब्दत्रयेण ।

शशिनि तु विधिरेष द्वादशेऽब्दे प्रकुर्यान्निगदितमिह चिन्त्यं सूतिकालेऽपि युक्त्या ॥ (२२ श्लो)

इति निषेकसमयग्रहस्थित्याधारेण वर्षत्रये, द्वादशवर्षे वा प्रसूतिकालः प्रोच्यते । तस्य दृष्टान्ततया भागवते -

" प्राजापत्यं तु तत्तेजः परतेजोहनं दितिः । दधार वर्षाणि शतं शङ्कमाना सुरार्दनात्" ॥ [भा: III :31 : 15:1]

इति दितेः वर्षशतकालिकगर्भधारणं दृश्यते । एवमेव तत्रैव निषेकाध्यायप्रोक्तविपरीतफलस्योदाहरणत्वेन भागवते -

" अथापि काममेतं ते प्रजात्यै करवाण्यलम् । यथा मां नातिवोचन्ति मुहूर्तं प्रतिपालय ॥

एषा घोरतमा वेला घोराणां घोरदर्शना । चरन्ति यस्यां भूतानि भूतेशानुचराणि च" ॥ [भा: III :14 : 21,22]

इति कश्यपः कामपीडितां दितिं प्रोच्य, कालातिक्रामिणीं तामुवाच -

"अप्रायत्यादात्मनस्ते दोषान्मौहूर्तिकादुत । मन्निदेशातिचारेण

देवानां चातिहेलनात् ॥

भविष्यतस्तवाभद्रौ अभद्रे जाठराधमौ ॥ [भा: III :14 :37,38] इति॥

अत्र मुहूर्तदोषेण दुष्टप्रसूतिः भवति इति कथितं दृश्यते।

२) संहिताविषयाः -

सामाजिकविषयाणां, वास्तुविषयाणाञ्च समासव्यासकथनं भवत्यत्र संहिताभागे इति सर्वविदितम् । तत्र संहिताभागप्रमाणभूते बृसत्संहिताख्यग्रन्थे वास्तुविद्याध्याये, प्रासादलक्षणाध्याये चैवमुक्तम् -

"तेषु च यथानुरूपं वर्णा विप्रादयो वास्याः" इति (६७) , "विहगादिभिरवलीनैराकम्पितपितदुःस्थितैश्च तथा" (१२) ,

"भूरिपुष्पविकरं सतोरणं तोयपूर्णकलशोपशोभितम् । धूपगन्धबलिपूजितामरं ब्राह्मणध्वनियुतं विशेद् गृहम् ॥" (१२३)

इति वास्तुविद्याध्याये चातुर्वर्ण्यगृहव्यवस्था, प्रासादेषु पक्षिणामाश्रयः, गृहद्वारालङ्करणादिकं वर्णितमस्ति। इदमेव भागवते निरूप्यते दशमस्कन्धे श्रीकृष्णस्य मथुरानगरप्रवेशसमये -

"ददर्श तां स्फाटिकतुङ्गगोपुरद्वारां बृहद्धेमकपाटतोरणाम्। ताम्रारकोष्ठां परिखादुरासदामुद्यानरम्योपवनोपशोभिताम् ॥"

"जुष्टेषु जालामुखरन्ध्रकुट्टिमेष्वाविष्टपारावतबर्हिनादिताम्। संसिक्तरथ्यापणमार्गचत्वरां प्रकीर्णमाल्याङ्कुरलाजतण्डुलाम् ॥"

"आपूर्णकुंभैर्दधिचन्दनोक्षितैः प्रसूनदीपावलिभिः सपल्लवैः।
सवृन्दरम्भाक्रमुकैः सकेतुभिः स्वलङ्कृतद्वारगृहां सपट्टिकैः ॥"
[भा: X:41:20,22,23]

एवं प्रासादलक्षणाध्याये "कृत्वा प्रभूतं सलिलमारामान् विनिवेश्य

च। देवतायतनं कुर्याद् यशोधर्माभिवृद्धये ॥"(१), "सरःसु नलिनीछन्ननिरस्तरवि रश्मिषु॥"(४), "वनोपान्तनदीशैलनिर्झरोपान्तभूमिषु ॥"(८) इत्यादिना जलाशयपूरितं, उपवनादिशोभितं, पक्ष्याश्रितं नगरं भवेत्, तत्रैव प्रासादश्च निर्मातव्य इति कथ्यते। एतस्यैव निरूपणं कृतमस्ति भागवते प्रथमस्कन्धे कृष्णस्य द्वारकागमने, एवं दशमे द्वारकानिर्माणसन्दर्भे च। उक्तं हि श्रीशुकेनेत्थम्-

" सर्वर्तुसर्व विभवपुण्यवृक्षलताश्रमैः ।
उद्यानोपवनारामैर्वृतपद्माकरश्रियम् ॥

गोपुरद्वारमार्गेषु कृतकौतुकतोरणाम् ।
चित्रध्वजपताकाग्रैरन्तःप्रतिहतातपाम्॥" [भा:I:11:12,13]

"दृश्यते यत्र हि त्वाष्ट्रं विज्ञानं शिल्पनैपुणम् ।
रथ्याचत्वरवीथीभिर्यथावास्तु विनिर्मितम् ॥"[भा:X:50:51]इति।

एवमेव शकुनशास्त्रविषया अपि सामूहिकफलसूचका इति कृत्वा बृहत्संहितादिसंहिताग्रन्थेषु पक्षिमृगादीनां व्यवहारेण शुभाशुभादिफलनिरूपणं कृतम्। तदत्र बृहत्संहितायां शिवरुताध्याये ; " धूमिताभिमुखी हन्ति स्वरदीप्ता दिगीश्वरान्"(३), इति शिवायाः दीप्तस्वरेण रुतेन राज्ञः नाशः प्रोच्यते। एवम् अश्वेऽङ्गिताध्याये "अकार्यभीतोऽश्रुविलोचनश्च शिवं न भर्तुस्तुरगोऽभिधत्ते"(१४) इत्यनेन रुदता वाजिना स्वामिनः अशुभं सूच्यते इत्युक्तम्। एवमेव "अपसव्यास्तु शकुना दीप्ता भयनिवेदिनः" इति (५७) शाकुनाध्याये, अन्यत्र च यच्चोक्तं, तस्य सङ्ग्रहः दृश्यते भागवते प्रथमस्कन्धे अर्जुनाकाङ्क्षिणः युधिष्ठिरस्य वचःसु - "ऊर्वक्षिबाहवो मह्यं स्फुरन्त्यङ्ग पुनःपुनः। वेपथुश्चापि हृदये आराद्दास्यन्ति विप्रियम्॥

शिवैषोद्यन्तमादित्यमभिरौत्यनलानना ।
मामङ्ग सारमेयोऽयमभिरेभत्यभीरुवत् ॥

शस्ताः कुर्वन्ति मां सव्यं दक्षिणं पशवोऽपरे ।
वाहांश्च पुरुषव्याघ्र लक्षये रुदतो मम"॥ [भाः I:14:11,12,13]

इत्थमनेके संहिताभागविषयाः लक्ष्यन्ते एवास्मिन् पुराणेऽनेकत्र ।

३) सिद्धान्तविषयाः -

गणिताधारेण ये विषयाः क्रियन्ते ते सिद्धान्तभागे अन्तर्भवन्तीति दैवज्ञाः । कालनिर्णयः, तदर्थं सूर्यादिग्रहसञ्चार निरूपणम्, पृथिव्यादिमाननिश्चयः इत्यादयोऽत्र विषयाः । एतन्निरूपके सूर्यसिद्धान्ताख्ये आर्षग्रन्थे सर्वस्यादौ कालनिरूपणं युगमानरूपेणारभ्यते । तत्र मध्यमाधिकारे मानुषवर्षैः दिव्यं वर्षं मीयते । तच्च ३६० मानुषवर्षाणि एकं दिव्यवर्षमिति गण्यते । तादृशदिव्यवर्षाणां द्वादशेन महायुगं (चतुर्युगम्) परिगण्यते "तद्वादश सहस्राणि चतुर्युगमुदाहृतम्" (१५श्लो) इति ।

एत एव विषयाः भागवते तृतीयस्कन्धे विदुरमैत्रेयसंवादे सुनिरूपिता भवन्ति एवम् -

"कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम् । दिव्यैर्द्वादशभिः वर्षैः सावधानं निरूपितम् ॥" (श्लो १८)

"चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम् । संख्यातानि सहस्राणि द्विगुणानि शतानि च ॥"(श्लो १९)

"त्रिलोक्या युगसाहस्रं बहिराब्रह्मणो दिनम् । तावत्येव निशा तात यन्निमीलति विश्वसृक् ॥"(श्लो २२)

"यावद्दिनं भगवतो मनून्भुञ्जंश्चतुर्दश॥"(श्लो २३) "स्वं स्वं कालं मनुर्भुङ्क्ते साधिकां ह्येकसप्ततिम् ॥"(श्लो २४) इति।

किञ्च पञ्चमस्कन्धे भूगोलखगोलादीनां वर्णनमत्युत्कृष्टं वर्तते । विना ज्योतिःशास्त्राध्ययनं सूर्यचन्द्रादिविषयकज्ञानं प्राप्तुं प्रभवेम, यद्यधीयते पञ्चमस्कन्धः। अत्र हि भूमेः सप्तधा विभागमुक्त्वा, तत्र जम्बूद्वीपवर्णनारम्भे

'यो वाऽयं द्वीपः कुवलयकमलकोशाभ्यन्तरकोशो नियुतयोजनविशालः समवर्तुलो यथा पुष्करपत्रम्' (V:16:5) इति वर्ण्यते । तत्र च जम्बूद्वीपे नववर्षाणि विभज्यन्ते यत्र भारतमिति वर्षं सुप्रसिद्धं भवति । किञ्च शास्त्रस्यास्य नायकः, सकलजीवराशिसृष्टिकर्ता, ब्रह्माण्डरक्षिता भवति साक्षात् सूर्यनारायणः । तदेवोच्यते भागवते पञ्चमे -

"सूर्येण हि विभज्यन्ते दिशः खं द्यौर्मही भिदा । स्वर्गापवर्गौ नरकाः रसौकांसि च सर्वशः ॥

देवतिर्यङ्मनुष्याणां सरीसृपसवीरुधाम् । सर्वजीवनिकायानां सूर्य आत्मा दृगीश्वरः ॥" (V:20:45,46) इति ।

एवमेव सूर्यसिद्धान्ते भूगोलाध्याये मयप्रश्नस्य उत्तरं वदन् सूर्यपुरुषः "वासुदेव एव परं ब्रह्म, तदेव पुरुषः, स प्रकृत्या अपः सृष्ट्वा, तासु वीर्यमवासृजत् । तदेव वीर्यमण्डं समभवत्। तत्र हिरण्यगर्भः प्रथमं व्यक्तीभूतः। स एव आदिभूतत्वात् आदित्य इति, प्रसूत्या सूर्य इति च" प्रथते। तदेव "तदण्डमभवत् हैमं सर्वत्र तमसावृतम्" (१४) इत्यादिना वर्णयति ।

श्रीमद्भागवते च तृतीयस्कन्धे सर्वैर्दैवतैः, अचेतनास्याण्डस्य चोदने शक्तिः प्रदर्शिता, परं सफलं न जातम् । परं यदा नारायणोऽन्तःप्रविष्टः तदाण्डमिदमुदतिष्ठत् अर्थात् चेतनवज्जातमित्युच्यते -

"ततस्तेनानुविद्धेभ्यो युक्तेभ्योऽण्डमचेतनम् । उत्थितं पुरुषो यस्मादुदतिष्ठदसौ विराट् ॥

हिरण्यमयादण्डकोशादुत्थाय सलिलेशयात् । तमाविश्य महादेवो बहुधा निर्बिभेद खम् ॥" (III:26:51,53)

एवं पञ्चमस्कन्धेऽपि "मृतेऽण्ड एष एतस्मिन्यदभूत्ततो मार्तण्ड इति व्यपदेशः हिरण्यगर्भ इति यद्धिरण्याण्डसमुद्भवः" इति वर्ण्यते । (V:20:44)

एवमेव प्रत्यर्तु प्रतिमासं कालभेदोऽपि दृश्यते । तत्कारणमुच्यते

भागवते "यन्मध्यगतो भगवान् तपतां पतिस्तपन आतपेन .... यथासवनमभिपद्यमानः मकरादिषु राशिषु अहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते । यदा मेषतुलयोर्वर्तते तदाहोरात्राणि समानानि भवन्ति यदा वृषभादिषु पञ्चसु च राशिषु चरति तदाहान्येव वर्धन्ते ह्रसति च मासि मास्यैका घटिका रात्रिषु"(V:20:3,4) । अपि च समग्राध्याये रवेः गतिर्वर्ण्यते।

किञ्च श्रीभास्कराचार्यविरचितसिद्धान्तशिरोमणौ चन्द्रग्रहणाधिकारे "भानोर्गतिःशरहता रविभिर्विभक्ता ..... विधुं विधुरिनं ग्रहणे पिधत्ते"(श्लो९) इति चन्द्रग्रहणविचारे यत्प्रोक्तं तदेवात्र भागवते 'यददस्तरणेर्मण्डलं प्रतपतस्तद्विस्तरतो योजनायुतमाचक्षते द्वादशसहस्रं सोमस्य त्रयोदशसहस्रं राहोर्यः पर्वणि तद्व्यवधानकृद्वैरानुबन्धः सूर्याचन्द्रमसावभिधावति।.... मुहूर्त्तमुद्विजमानश्चकितहृदयः आरादेव निवर्तते तदुपरागमिति वदन्ति लोकाः'(V : 24 : 2 , 3) इति भूच्छायायाःराहुरूपकं कृत्वा उपरागः वर्णितः ।

एवमेव भूगोलस्य प्रमाणलक्षणतः वर्णनं कृतमस्ति पञ्चमस्कन्धे 'तस्मात्प्राधान्येनैव भूगोलविशेषं नामरूपमानलक्षणतो व्याख्यास्यामः' (V:16:4) इत्यारभ्याध्यायपञ्चकेन । अन्ते लोकालोकाचलस्य वर्णने 'एतावाल्लोकविन्यासो मानलक्षणसंस्थाभिर्विचिन्तितः कविभिः स तु पञ्चाशत्कोटिगणितस्य भूगोलस्य तुरीयभागोऽयम् लोकालोकाचलः' (V:20:38) इति भू-मानं ५०,००,००,००० योजनानीति निरूपितम्।

एवमेव प्राचीनाचार्यैरेवोदीरिता शिशुमारसंस्थापि भागवते "केचनैतज्ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयन्ति"(V:23:4) इति विशदतया प्रोक्ता । किं बहुना दैवज्ञैः कर्मफलतया ये नरकाः प्रोच्यन्ते ते चोक्ताः पञ्चमस्कन्धान्ते "तत्र हैके नरकानेकविंशतिं गणयन्ति अथ तांस्ते राजन्नामरूपलक्षणतोऽनुक्रमिष्यामस्तामिस्रोऽन्धतामिस्रो .... नरका

विविधयातनाभूमयः"(V:26:7) इति।

एवमेव सर्वान्ते द्वादशस्कन्धे एकादशाध्याये सूर्यस्य प्रतिमासगतिः, नाम, फलञ्च वर्ण्यते। किञ्च सूर्यसिद्धान्ते ज्योतिःशास्त्रस्य आदिमत्वं कथयति 'शास्त्रमाद्यं तदेवेदम्'(म.अ.९) इति । वेदादीनां सत्वे वेदाङ्गभूतस्यास्य आद्यत्वं कथमिति सन्देहे तत्रैवोच्यते 'यत्पूर्वं प्राह भास्करः । युगानां वरिवर्तेन कालभेदोऽत्र केवलः' (श्लो ९) इति । अमुमेव विषयं प्रमाणयति पुराणम् -"एवं ह्यनादिनिधनो भगवान् हरिरीश्वरः। कल्पे कल्पे स्वमात्मानं व्यूह्य लोकानवत्यजः"॥ (XII:12:50) इति।

इत्थं श्रीमद्भागवतपुराणे आद्यस्कन्धात् आन्तं ज्योतिःशास्त्रविषयाः दरीदृश्यन्ते इति शम्॥

उपयुक्तग्रन्थसूची

१) श्रीमद्भागवतपुराणम्- मोतीलाल बनारसीदास्, देहली १९८३

२) सूर्यसिद्धान्तः - चौखम्भासंस्कृतभवन्, वाराणसी १९९५

३)सिद्धान्तशिरोमणिः - चौखम्भासंस्थान, वाराणसी २००५

४) बृहज्जातकम्- मोतीलाल बनारसीदास्, देहली १९८५

५)बृहत्संहिता - चौखम्भासंस्थान, वाराणसी १९९५

■ ■ ■

मराठी

विभाग

कुन्तकाचा औचित्यविचार

डॉ. रेणुका बोकारे

कुन्तकाने वक्रोक्तिसिद्धान्ताची मांडणी केली; ही मांडणी करीत असताना वक्रकाव्यात 'औचित्या'चे स्थान काय असावे याचा विचारही स्वग्रंथात वेळोवेळी स्पष्ट केला. काव्यात वक्रता असलीच पाहिजे परंतु या वक्रतेला औचित्याची बैठक असणे कुन्तकाने आवश्यक मानले आहे. काव्यलक्षणातील शब्दार्थाचे परस्परस्पर्धित्वरूप साहित्य असो किंवा सुकुमारादी काव्यमार्ग असोत अथवा वक्रतेचे भेद–प्रभेद असा एकूणच काव्यातील औचित्यानुरूपता त्याने अनिवार्य मानली आहे.

सुकुमार, विचित्र आणि मध्यम या तीन मार्गांना समान असणा–या गुणांमध्ये औचित्य आणि सौभाग्य गुणांचा समावेश करून कुन्तक म्हणतो –

एतत्त्रिष्वपि मार्गेषु गुणादितयमुज्ज्वलम् ।
पदवाक्यप्रबन्धानां व्यापकत्वेन वर्तते ।। व.जी. 1/57

पदवाक्यप्रबंधामध्ये औचित्य आणि सौभाग्य गुण व्यापकत्वाने आणि उज्ज्वलरूपाने विद्यमान असतात.

उचिताभिधानजीवितत्वाद् वाक्यस्याप्येकदेशऽप्यौचित्यविरहात् तद्विदाल्हादकारित्वहानिः ।1

पदाचे उचित रूपाने केलेले कथन हे वक्रतेच्या दृष्टीने जीविताप्रमाणे असल्याने, वाक्यातील किंवा प्रबंधकाव्यातील एका अंगातही औचित्याचा अभाव असल्यास सहृदयांच्या आल्हादकारित्वात हानी येते. काव्याचे जीवित वक्रोक्ती आणि वक्रोक्तीचे जीवित औचित्य असल्याचे दिसून येते.

काव्यलक्षणातील औचित्यविचार –

अप्रयत्नविरचितेत्यर्थः। व्यसनितया प्रयत्नविरचने हि प्रस्तुतौचित्य–परिहाणेर्वाच्यवाचकयोः परस्परस्पर्धित्वलक्षणसाहित्यविरहः पर्यवस्यति ।2

कवीला अभिप्रेत असा आशय व्यक्त करणा–या समर्थ शब्दाचा अभाव

किंवा स्वतःच्या चमत्कृतीने युक्त अशा अर्थाचा अभाव झाल्यास साहित्यविरह होतो. ही शब्दार्थ योजना सहज, कुठल्याही विशेष प्रयत्नांशिवाय असावी तरच काव्य आनंद देते.

अनौचित्याची उदाहरणे – साक्षात् कालिदासासारख्या महाकवीच्या काव्यातील अनौचित्य कशाप्रकारे काव्यरसाला हानी पोहचविते याचे रघुवंशातील उदाहरण –

पुरं निषदाधिपतेस्तदेद् यस्मिन् मया मौलिमणि विहाय।
जटासु बद्धास्वरूदत् सुमन्त्रः कैकेयि कामाः फलितास्तवेति।। रघु. 13/59

लंकेवर विजय मिळवून अयोध्येला परतत असताना रामचंद्र सीतेला म्हणतात, ही निषादराज गुहाची ती नगरी आहे जेथे मी मुकुट उतरवून जटा बांधल्यावर सुमंत्राने म्हटले होते हे कैकेयी! तुझे मनोरथ सफल झाले.

सुमंत्राच्या उद्गारांचा रामाने पुनरुच्चार करणे गैर आहे. चौदा वर्षांचा वनवास चेह–यावरची रेष आणि भाव बदलू न देता जितक्या सहजतेने रामाने स्वीकारला त्या रामाच्या तोंडून या कटु आठवणीचा पुनरुच्चार हा अनौचित्यकारक असून काव्यरसाची हानी करणारा तर आहेच पण रामाच्या व्यक्तिमत्त्वालाही बाधा पोहचवणारा आहे. रामाचे 'पुरुषोत्तम' ख्यातीप्राप्त व्यक्तिमत्त्व प्रस्तुत औचित्यहीन उद्गारामुळे मलीन होते. रघुवंशासारख्या प्रबंधकाव्यातील एखाद्याही प्रसंगात निर्माण झालेल्या औचित्यहानीमुळे संपूर्ण प्रबंधाला गालबोट लागते.

प्रबन्धस्यापि कस्यचित् प्रकरणैकदेशेऽप्यौचित्यविरहादेकदेश–दाहदूषितदग्ध–पटप्रायता प्रसज्यते।3

सद्यः पुरीपरिसरोपि शिरीषमृद्वी,
सीता जवात् त्रिचतुराणि पदानि गत्वा।

गन्तव्यमद्य कियदित्यसकृद् ब्रुवाणा,
रामाश्रुणः कृतवती प्रथमावतारम्। बालरामायण 4/34

शिरीष फुलासमान कोमल असणा–या सीतेने अयोध्यानगरीच्या सीमेबाहेर दोन–चारच पावलं चालल्यावर आणखी किती चालायचे आहे? असे पुन्हा पुन्हा विचारून रामाला रडविले.

शिरीष फुलासमान सुकुमार जनककन्या सीतेला कष्टाचा व त्यातही चालण्याचा अनुभव नसल्याने अयोध्यानगरीच्या बाहेर पडल्यावर ती थकून गेली. त्यामुळे तिने वारंवार – असकृद् किती चालायचे आहे असे विचारून रामाच्या डोळयात पाणी आणले. या श्लोकात असकृद् हे पद अनौचित्यकारी आहे, कारण

सीतेच्या केवळ एकदाच विचारल्यानेही राम दुःखीच होणार! मग वारंवार विचारणे 'भूमिकन्या' सीतेला अजिबातच शोभत नाही. कवीच्या किंचित् अनवधानाने अनौचित्य शब्दयोजनेने सुंदर श्लोकाची हानी होते. 'असकृद' ऐवजी 'एकदा' या अर्थी 'अवशम्' शब्द सुयोग्य ठरला असता.

काव्यातील दोष हा दोषच असतो मग तो नवकवीचा असो वा महाकवीचा! स्वाभाविक सौंदर्याने युक्त सुकुमार मार्गाचा अवलंब करणा—या, प्रतिभावान कालिदासाच्या काव्याचीच इतकी सूक्ष्म चिकित्सा करणे शक्य आहे परंतु आहार्य अर्थात् कृत्रिम काव्याच्या बाबतीत मात्र ही चिकित्सा करावीशीच वाटत नाही —

एतच्चैतस्यैव कवेः सहजसौकुमार्यमुद्रितसूक्तिपरिस्पन्दसौन्दर्यस्य पर्यालोच्यते,
न पुनरन्येषामाहार्यमात्रकाव्यकरणकौशलश्लाघिनाम् ।4

यावरून कृत्रिम किंवा व्युत्पत्तीजनक काव्ये ही स्वाभाविक सौंदर्याने युक्त काव्यांपेक्षा आस्वाद्य ठरत नाही असा कुन्तकाचा अभिप्राय असल्याचे लक्षात येते.

कुन्तकाचे औचित्यलक्षण

कुन्तकाने सुकुमारादी तीन मार्गांना समान गुण म्हणून औचित्य गुण सांगितला आहे.

आञ्जसेन स्वभावस्य महत्त्वं येन पोष्यते ।
प्रकारेण तदौचित्यमुचिताख्यानजीवितम् ।। व.जी. 1/53

यत्र वक्तुःप्रमातुर्वा वाच्यं शोभातिशायिना ।
आच्छाद्यते स्वभावेन तदप्यौचित्यमुच्यते ।। व.जी. 1/54

औचित्यपूर्ण वर्णनाने युक्त पदार्थांचा स्वभाव औचित्य गुणामुळे पुष्टतेस प्राप्त होतो आणि वक्ता व श्रोत्याच्या रमणीय स्वभावाने प्रतिपाद्य अर्थ आच्छादित केला जातो, तो औचित्य गुण असे त्याचे स्वरूप आहे.

औचित्यपूर्ण वक्रकाव्याचे उदाहरण —

द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः ।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी ।।
कु. सं. 5/71

कुमारसंभवातील या श्लोकात बटुवेषातील शिव भगवान शंकराची निंदा करून त्याच्याशी विवाह करण्यापासून पार्वतीला परावृत्त करण्याचा प्रयत्न करतो. ती परावृत्त व्हावी यासाठी कालिदासाने शंकराची भणंग अवस्था व पार्वतीसमोर वर

म्हणून त्याची अयोग्यता वर्णन करण्यासाठी 'कपालिन्' या औचित्यपूर्ण शब्दाची निवड करून त्याची सुयोग्य जागी योजना केली आहे. तसेच द्वयं, सम्प्रति, कान्तिमती कला, कलावतः, या चपखल शब्दांद्वारे पार्वतीचे विशेष सांगून प्रार्थना या शब्दातील वक्रता सूचित केली आहे.

परस्परस्पर्धित्वरूप साहित्यामधील शब्दार्थ हे परस्पर अनुरूप, सक्षम, व उचित जागी उचित शब्दाने युक्त असावे याचा प्रस्तुत श्लोक हे उत्तम उदाहरण आहे. कालिदासाचे काव्य आस्वाद्य आणि कालकसोटीवर टिकण्याचे मर्मच या औचित्यपूर्ण शब्दार्थाच्या सन्निवेशात आहे.

शरीरमात्रेण नरेन्द्र तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः।
आरण्यकोपात्तफलप्रसूतिः स्तम्बेन नीवार इवावशिष्टः।।रघु. 5/14

रघुराजाने नुकत्याच संपन्न झालेल्या विश्वजित् यज्ञात दान केल्यामुळे त्याची निष्कांचन अवस्था 'स्तम्बेन नीवार इव अवशिष्टः' या उपमेच्या साहाय्याने कौत्साने टिपली आहे. उपमा अलंकाराच्या योजनेने काव्यौचित्यास परिपुष्ट केले आहे.

वक्रकाव्याची रचना करणा—या कवीला औचित्याची जाण असावी तरच तो सुकवी बिरूदाला पात्र ठरतो — सुकविः औचित्यपद्धतिप्रभेदचतुरः ।5 या व्याख्येत कालिदास बसतो हे वरील दोन उदाहरणांवरून दिसून येते.

वक्रताभेद आणि औचित्य

कुन्तकाने प्रायः सर्वच भेदांमध्ये कोणत्या ना कोणत्या स्वरूपात औचित्यविचार केला आहे.वर्णविन्यास वक्रतेत वर्णांचा विन्यास वक्रतापूर्ण असावाच परंतु प्रसंगाला अनुरूप असणे अनिवार्य आहे, तसेच ओढून ताणून नको. पदपूर्वार्धवक्रतेच्या विशेषण, वृत्ति व लिंग वक्रतेमध्ये तसेच वाक्यवक्रतेअंतर्गत येणा—या अलंकारांच्या वर्ण्यविषयानुरूप योजनेत, प्रकरणवक्रता व प्रबंधवक्रतेच्या विविध भेदांमध्ये औचित्याचा विचार त्याने केला आहे. विशेषणाच्या प्रभावाने क्रिया किंवा कारकाचे सौंदर्य स्फुरित होते ती विशेषणवक्रता होय. या विशेषणवक्रतेचे साफल्य हे औचित्यपूर्ण विशेषणाच्या योजनेद्वारे होते. या औचित्यपूर्ण विशेषणांची योजना हे उत्तम काव्याचे जीवन असते. कारण या औचित्यपूर्ण विशेषणांनी युक्त उत्तम काव्यात रस उत्कर्षाप्रत पोहोचलेला असतो.

एतदेव विशेषणवक्रत्वं नाम प्रस्तुतौचित्यानुसारी सकलसत्काव्यजीवितत्वेन लक्ष्यते।यस्मादनेनैव रसः परां परिपोषपदवीमवतीर्यते।6

औचित्यपूर्ण वक्रकाव्याचे साफल्य हे रसपरिपोषात आहे हे स्पष्ट आहे.

पूर्वसूरींच्या विचारांच्या पार्श्वभूमीवर कुन्तकाचे वेगळेपण – औचित्यविचार म्हटल्यावर क्षेमेन्द्राचा औचित्यविचारचर्चा हा ग्रंथ आठवतो, ते साहजिकच आहे. काव्यशास्त्रीय परंपरेत काव्यातील औचित्याचा विचार झाल्याचे दिसून येते. फार काय साक्षात् औचित्य शब्दाचा निर्देश नसेल परंतु काव्यातील प्रयोज्य–अप्रयोज्य शब्दांचा विचार असो वा दोषप्रकरण असो भामह, आनंदवर्धन, मम्मट, पं. जगन्नाथापर्यंत सर्वांनीच हा विचार काव्यविषयाच्या अनुषंगाने सोदाहरण मांडला आहे. याचे महत्त्वाचे कारण म्हणजे काव्य हे केवळ शोभेची वस्तू नसून ती आस्वाद्य, सजीव कलाकृती आहे हे आहे.

भामहाने काव्यात कोणते शब्द योग्य आणि अयोग्य यांचा विचार केला आहे. त्याला तो प्रयोज्य–अप्रयोज्य शब्दविचार म्हणतो. हा विचार अंततोगत्वा काव्यात ग्राम्य, अनागर, दोषपूर्ण शब्दांचा त्याग आणि योग्य व विषयवस्तूला औचित्यकारी शब्दांचाच विचार मांडणारा आहे. भामहाने प्रत्यक्ष औचित्य हा शब्द वापरला नसला तरी काव्यनिर्मिती प्रक्रिया विशद करताना मालाकाराचा दृष्टांत देऊन त्याने काव्यातील शब्दार्थौचित्याचा विचारच केल्याचे दिसून येते.

भामहानंतर औचित्याचा सविस्तर विचार आनंदवर्धनाने केला आहे. त्याने कविगत, काव्यातील पात्रे, रसभावगत, काव्यप्रकारगत, परुषा, नागरिका इ. वृत्तिंसह गद्यबंधातील औचित्याचा व्यापक विचार केला आहे. मुक्तक असो वा प्रबंधकाव्य किंवा गद्यबंध असो यामध्ये असणारी रसाभिव्यक्ती ही भावौचित्यपूर्ण कथारचना, अनुरूप संध्यंगविन्यास, समुचित रसभावविलास व सुसंगत अलंकारयोजना हयांच्याद्वारे होत असते. औचित्याची आपली भूमिका पुढील कारिकेत आनंदवर्धन अधिक स्पष्ट करतो–

अनौचित्यादृते नान्यद् रसभंगस्य कारणम् ।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत् परा ।। ध्वन्यालोक, उद्योत 3, पृ. 362

औचित्य हे उपनिषदांप्रमाणे रसरूप ब्रह्मतत्त्वाचे प्रकाशक आहे. हे सांगून

वाच्यानां वाचकानां च यदौचित्येन योजनम् ।
रसादिविषयेणैतत्कर्म मुख्यं महाकवेः ।। ध्व. 3/32

रसादिंनाच मुख्यतया काव्यार्थ मानून त्यांच्या अभिव्यक्तीला अनुरूप शब्द व अर्थाची योजना करणे हे महाकवीचे कर्म आहे हे पुन्हा एकदा अधोरेखित करतो.

हाच विचार मम्मटाने दोषप्रकरणात केला आहे. दोषाची व्याख्याच

'मुख्यार्थहतिर्दोषः ।'7 अशी करून हा मुख्यार्थ कोणता? याचे उत्तर रसश्च मुख्यः ।8 असे स्पष्ट करून त्याने आनंदवर्धनाच्या मताला दुजोराच दिलेला आहे. याशिवाय संपूर्ण काव्यातील दोषांचा विचार मग तो अयोग्य जागी सुयोग्य शब्दाचा किंवा सुयोग्य जागी अयोग्य/ग्राम्य/रासवट/अश्लील शब्दाचा असो, हा शेवटी काव्यातील औचित्याकडेच निर्देश करणारा आहे.

प्रत्येक काव्यशास्त्रज्ञाने काव्याचा एका विशेष तत्त्वाच्या अनुषंगाने विचार केला तरी त्याला त्या विशिष्ट घटकाची गतार्थकता ही औचित्यात असल्याचे नमूद करणे आवश्यक वाटले आणि शेवटी अलंकार, ध्वनी, वक्रोक्ती असो वा औचित्य ही सर्व तत्त्वे रसापेक्षीच असावेत किंबहुना त्यांनी रसौचित्य सांभाळावे हा आग्रह सर्वांचाच! म्हणून क्षेमेन्द्राने दिलेला दृष्टान्त योग्यच ठरतो – अलंकार अयोग्य अवयवाला घातले तर ते शोभून न दिसता रडतात. अंततोगत्वा काव्याची इतिश्री आणि त्याचे सौंदर्य खुलविणारी जी काही तत्त्वे किंवा अलंकरणे आहेत तिला औचित्यच हवे, ते राखण्याचे कार्य कवीने केले पाहिजे, नव्हे ती त्याची जबाबदारीच ठरते हे पूर्वसूरींच्या आणि कुन्तकाच्या विचारांचे सार आहे.

निष्कर्ष

■ वक्रकाव्यातील औचित्याचे अनिवार्यत्व आणि औचित्यगुणाच्या सन्निवेशाने वक्रोक्तिकाव्याचा होणारा परिपोष या दोन्ही गोष्टींवर कुन्तकाचा भर आहे.

■ वक्रोक्ती आणि औचित्य यांचा घनिष्ठ संबंध असला तरी हे दोन्ही सिद्धांत एकरूप नाहीत किंवा परस्परांचे पर्यायही नाहीत कारण कुन्तकाच्या मते, औचित्य हे वक्रोक्तीचे जीवित आहे तरीही ते दोन्ही एकच नाहीत. वक्रतायुक्त काव्याचा मूलाधार औचित्य आहे कारण औचित्यविहीन वक्रकाव्य सहृदयांना आल्हादक ठरत नाही म्हणूनच कुन्तकाने औचित्य हे काव्यसौंदर्याचा म्हणजेच वक्रतेचा अनिवार्य सामान्य गुण मानला. कुन्तकाला वक्रतेच्या सर्व भेदांमध्ये आणि काव्यसौंदर्यात औचित्याची स्थिती अनिवार्यतेने मान्य आहे. परंतु औचित्याच्या सर्व रूपांमध्ये वक्रोक्ती अनिवार्य नाही. याशिवाय या दोन्ही सिद्धांताच्या मूळ दृष्टिकोनांमध्ये एक भेद आहे तो असा – वक्रोक्तीचा आधार वस्तुनिष्ठ कल्पना आहे तर औचित्याचा आधार व्यक्तिनिष्ठता आहे. **काव्याचे जीवित वक्रोक्ती; वक्रोक्तीचे जीवित औचित्य; वक्रकाव्याचा आधार प्रतिभा आणि औचित्य आणि औचित्यपूर्ण वक्रकाव्याचे जीवित रस अशी ही श्रृंखला आहे.**

■ औचित्यपद्धतिप्रभेदचतुरः सुकविः । अशी उत्तम कवीची व्याख्याच तो

करतो. या सर्व दृष्टीने विचार करता काव्यात औचित्य तत्त्वाची मानलेली अनिवार्यता आणि त्यामुळे निर्माण होणारे काव्यसौंदर्य किंवा अनौचित्यामुळे होणारी काव्यसौंदर्याची हानी याकडे कुन्तकाने काव्यज्ञांचे लक्ष वेधले आहे. वक्रोक्तिकाव्याचे नियामक तत्त्व म्हणून त्याने प्रतिभा आणि औचित्य यांना दिलेले स्थान हे कुन्तकाचा काव्यनिर्मिती संदर्भातील गंभीर दृष्टिकोन आणि साहित्याचा व्यासंग अधोरेखित करणारा आहे.

■ पूर्वसूरी आणि कुन्तक यांनी काव्यातील औचित्यपूर्ण शब्दांची निवड आणि योजना ही रसापेक्षीच मानली आहे. त्यामुळे कुन्तकाने पूर्वसूरींच्याच पावलावर पाऊल टाकून औचित्याचे महत्त्व मान्य केले असल्याचे दिसते. वक्रोक्तिकाव्यासारख्या सर्जनशील, अभिव्यक्तीच्या नावीन्यतेचे दर्शन घडविणा–या काव्यप्रकाराला औचित्यतत्त्वाचे पालन करणे इष्ट ठरते. सर्जनशील वक्रोक्ति काव्याविष्काराकरिता औचित्यतत्त्वाचे महत्त्व मान्य करणारा कुन्तक हा निश्चितच क्रान्तदर्शी साहित्यशास्त्रज्ञ ठरतो.

संदर्भ सूची

1. वक्रोक्तिजीवित, संपा. डॉ. नगेन्द्र, व्याख्याकार, आचार्य विश्वेश्वर, दिल्ली विश्वविद्यालय, दिल्ली, प्र. आ. 1995, पृ. 163
2. तत्रैव, पृ. 184
3. तत्रैव, पृ. 164
4. तत्रैव, पृ. 167
5. तत्रैव, पृ. 531
6. तत्रैव, पृ. 236
7. काव्यप्रकाश, व्याख्याकार डॉ. सत्यव्रत सिंह, चौखम्बा विद्याभवन, वाराणसी, अकरावी आवृत्ती, 1998, पृ.181
8. तत्रैव

■ ■ ■

हिन्दी
विभाग

प्रारम्भिक शिक्षण में ज्योतिर्गणित की प्रासंगिकता

डॉ.कृष्णकुमार पाण्डेय

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।[1]
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।।

उपनिषद् दर्शन के इस मंत्र के दार्शनिक व आध्यात्मिक व्याख्या के अतिरिक्त गणितीय व्याख्या ज्ञानपिपासुओं को विस्मित कर देता है। शून्य के योग (+) शून्य के वियोग (–) अथवा शून्य में शून्य का गुणन भी शून्य होता है। इस प्रकार की व्याख्यायें जो गणितीय जटिलता को सहजता से जानने में सहायक है। उक्त श्लोक सरल–सुखद–सुगम्य व आनन्ददायी भी है, जो थोडे शब्दों में व्यापक अर्थों को सहेजे हुये है। प्रो. इरविन की पुस्तक स्पेस टाइम स्ट्रक्चर के अनुसार "The most important number in Mathematics is Zero" गणित के विषय में विद्वानों की यह धारणा कि "Mathematics is the Queen of all Sciences" अर्थात् सर्व विज्ञान शाखाओं के मूल में गणित है। भास्करीय बीजगणित में शून्य के गणितीय क्रिया को अत्यन्त सुन्दर श्लोक में अभिव्यक्त किया है।

"खयोगे वियोगे घनर्णं तथैव च्युतं शून्यतस्तद्विपर्यासमेति।[2]
बधादौ वियत्खस्य खं खेनघाते खहारौभवेत् खेन भक्तस्य राशिः।।"[3]

इस श्लोक में 'खहर' राशि का उल्लेख है अर्थात् जिस किसी राशि में शून्य से भाग दिया जाय वह राशि खहर (अनन्त) हो जाती है।

वर्तमान में शिक्षण के अनेकानेक नवीन एवं प्राचीन विषयों के प्रवाह में गणितशास्त्र स्वयं में महत्त्वपूर्ण होते हुये अनेक विषयों के सहायक या मुख्यता के रुप में प्रयुक्त है। तकनीकि कालखण्ड होने के कारण हमारी निर्भरता तकनीकि यंत्रो पर बढती जा रही है। यह अधिकाधिक यंत्रो पर निर्भरता हमारे भविष्य में शिक्षण विकास के लिए कुछ दृष्टि से हानिप्रद प्रतीत होता है। संस्कृत के प्राचीन ज्योतिर्गणित के ग्रन्थों में महत्त्वपूर्ण भास्करकृत सिध्दान्त शिरोमणि है। सिध्दान्त शिरोमणि ग्रंथ के वासना

भाष्य टीका में श्रीनृसिंह दैवज्ञ के अनुसार– जिस शास्त्र में संख्याओं की गणना की जाये उसे गणित शास्त्र कहते हैं। **"गण्यते संख्यायते तद् गणितम्"**।[4] इस ग्रन्थ के चार भाग लीलावती (अंकगणित) भास्करीय बीजगणितम्, ग्रहगणितम् एवं गोल गणितम् है।

लीलावती ग्रंथ में भास्कर ने संकल्प किया कि लालित्यपूर्ण पद्य के माध्यम से गणित को अभिव्यक्त करुंगा–

"पाटीं सद्गणितस्य वच्मि चतुरप्रीतिप्रदां प्रस्फुटां।[5]
संक्षिप्ताक्षरकोमलामलपदैर्लालित्यलीलावतीम्"।।

गणितीय परिपाटी को भास्कर ने एक क्रमबध्द सोपान के रुप में संख्या से प्रारम्भ कर खगोलीय गणना तक की सम्पूर्ण गणितीय जटिलताओं को सहजता से अभिव्यक्त किया है।आज जब कि छात्रों में प्रारम्भिक गणित की जटिलताओं के कारण विषय में अरुचि उत्पन्न होने लगती है। संगणक (Calculator) पर निर्भरता की समस्या के अनेक कारणों का समाधान करने में ज्योतिर्गणितशास्त्र का महत्त्वपूर्ण योगदान हो सकता है। कुछ विशेष कारणों का उल्लेख निम्नलिखित है –

1. अंको के स्थानादि गणना के प्रति अरुचि।
2. योग, अन्तर, गुणा, भाग में अरुचि।
3. वर्ग व वर्ग मूल।
4. घन व घनमूल।
5. संगणक (Calculator) पर निर्भरता।
6. भिन्न गणित की समस्या।
7. शून्य के विविध प्रयोग
8. त्रैराशिकादिक समस्या।
9. श्रेणीव्यवहार।
10. क्षेत्रव्यवहार।
11. भुज कोटि कर्ण का ज्ञान।
12. वृत्त सम्बन्धि गणित।
13. छाया व्यवहार।

14. कुट्टक।

15. अंकपाश। इत्यादि।

उपरोक्त सभी गणितीय समस्याओं का समाधान लीलावती ग्रंथ शिक्षण से निम्नरुप में सम्भव होता है।

1. संस्कृत श्लोक (पद्य) में गणित शास्त्र होने से सहजता व सरलता है। 2. श्लोक (पद्य) कर्ण प्रिय होते हैं। 3. कंठ करने में सुविधाजनक। 4. खेल खेल में जटिलताओं का समाधान। 5. वर्ग घन की एक से अधिक विधि एक ही श्लोक में होना। 6. गणित का संगीतमय होना। 7. लीलावती की विषय क्रमबद्धता। 8. शनैः शनैः अपनापन का आभास। 9. कथा–कहानी जैसे उदाहरण। 10. दैनन्दिन व्यावहारिक जीवन के करीब की बातों का उल्लेख इत्यादि।

